तिम्रा सखी ती न नजीक आउँथे,
बाँ बाँ गरी धेनुसरी न बोल्दथे ।।

उर्वशी—

स्वभावले प्रेरित भै नदीसरी
मेरा सखी ती सुरलोकसुन्दरी ।
बिस्तार बिस्तार पुरूरवाकन
सक्ने भएछन् रसमा भुलाउन ।।

बडा बडा युद्धहरू गरीकन
सखाप पार्नाकन दस्युका गण ।
पुरूरवा सक्छ भनी दिई वर
बढाउँथे देव हजूरको बल ।।

पुरूरवा—

पर्दा हटेका सुरलोकसुन्दरी
मेरो परे साम्मु जसै त्यसै घरी ।
तर्सी मृगी कैं रथसाथ नारिँदा
घोडीसरी दूर पुगे कता कता ।।

मनुष्यले यी सुरसुन्दरीसँग
संपर्कको निम्ति भएर उत्सुक ।
बोल्यो तथा काम कुनै गर्‍यो भने
बलै गरी ओठ निजी चपाउने ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

घोडीसरी देह निजी लुकाउँदै
पुग्दा रहेछन् सुरसुन्दरी परै ।
अनर्थ शङ्का मनमा लिईकन
हुँदैन राम्रो लिनु निष्ठुरीपन ।।

मेरी भई सौख्यसुधा बहाउँथ्यौ,
तिमी उज्यालो घर नै गराउँथ्यौ ।
तिमी हरायौ बिजुलीसरी बनी,
मेरो अँध्यारो घर भो सबै अनि ।।

जन्म्यो र छोरो यदि उर्वशीतिर
दीर्घायु भै वीर तथा सुशिक्षित ।
यो राज्य थाम्नाकन योग्य भो भने
उपाय मिल्थ्यो मन यो बुझाउने ।।

उर्वशी —

हजूरले जो अघि तेज छोड्नुभो,
मैले लिएकी छु धरोट तेज सो ।
हुनेछ छोरो त्यसले हजूरको,
त्यो गर्न सक्नेछ रजाइँ राज्यको ।।

थाहा भएथ्यो अघि नै मलाई यो,
मैले भनेथें नि हजूरलाइ यो ।
हजूरले सुन्नुभएन, तोड्नुभो
कबूल, बेपर्वाक छ धेर बोल्नु यो ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

पुरूरवा —

जन्मन्छ छोरो कहिले, बढीकन
चिन्नेछ त्यल्ले कहिले पिताकन ।
बा बा भनी त्यो कहिले कराउला
चुहाउँदै आँसु नगीच आउला ॥

मिलेजुलेका भन दम्पतीकन
वियोग भोगाउँछ उर्वशी कुन ?
जन्मन्छ तिम्रो जब पुत्र त्यो दिन
होला उज्यालो ससुराहरूकन ॥

उर्वशी —

हजूरको आत्मजले क्रमैसित
गर्नेछ लीला सब शैशवोचित ।
साँच्चै कुरा भन्छु हजूरलाई म,
पर्दैन धन्दा यसमा कुनै लिन ॥

हजूरको पुत्र हजूरको घर
पठाउँला, फर्कनुहोस् घरैतिर ।
अबूझ फैं भै हठ यो नगर्नुहोस्,
मसाथ बस्ने अब बात छोड्नुहोस् ॥

पुरूरवा —

तिम्रो मिल्ली साथ सुखी थियो जुन
पुरूरवा, त्यो अब दुःखभाजन ।
भई कतै पर्वतबाट लड्दछ,
भौंतारिँदै त्यो कि त दूर पुग्दछ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

खाली भुईँमा कि सुतेर मर्दछ,
ब्वाँसाहरूको कि त भोज्य बन्दछ ।

उर्वशी —

लडी खसी मर्छु भनी नभन्नुहोस्,
हत्या गरी मर्नु हुँदैन बुझ्नुहोस् ।।

ब्वाँसाहरूका मुखमा नपर्नुहोस्,
अकालमै प्राण त्यसै नफाल्नुहोस् ।
स्त्रीजातिको प्रेम रहन्न सुस्थिर
त्यो प्रेम धोका हुन सक्छ आखिर ।।

स्वरूप छोडीकन मर्त्य झैँ बनी
मैले बिताएँ अघि चार वर्ष ती ।
खान्थेँ म थोरै घिउ एक छाक नै
तथापि सन्तुष्ट थिएँ म त्यत्तिमै ।।

पुरूरवा —

अकासिँदै मेघसमान उर्वशी
भइन् भने तापनि बुद्धिले कसी ।
म ल्याइछोड्नेछु यहीँ तिनीकन,
रास्रै बुझेको छु वशक्रियाकन ।।

चाहिन्छ जे जे जति उर्वशीकन
ती ती सबै वस्तु यहीँ पुऱ्याउन ।
पुरूरवा भूपति यो तयार छ,
आऊन आऊ बस साथ बिन्ति छ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

यो चित्त मेरो विरहाग्नि हर्हरी
बली डढ्यो, फर्कन फर्क सुन्दरी ।

उर्वशी —

द्यौताहरूको छ भनाइ बुझ्नुहोस्,
म भन्छु त्यो, धैर्य गरेर सुन्नुहोस् ।।

पुरूरवाका अब थोर छन् दिन,
सुपुत्र होला, त्यसले पिताकन ।
उद्धार गर्नाकन यज्ञ लाउला,
पुरूरवा स्वर्गविषे रमाउला ।।

(वि. सं. २०३९ मा प्रकाशित पूर्णिमा ५३ अङ्कका ६–९ पृष्ठबाट)

CC-0. Nepal Sanskrit Academy, Kathmandu

वीरगाथा

(ऋग्वेद, ८ अष्टक ५ अध्याय २२-२३ वर्ग)

ज्यादै तीखो प्रहरण लिई वेगले दौडिएर
हान्ने साँढेसदृश जनको त्रासकारी भएर ।
गर्दै ठूलो स्वर समरमा होशियारी गरेर
मार्दै, स्वाट्टै सँग जितिदिए इन्द्रले सैन्य धेर ।।

ज्यादै शूरा रणधरणिमा हार कैल्यै नखाने
तीखा तीखा प्रहरण लिई शत्रुलाई निमोठ्ने ।
त्यस्ता इन्द्र प्रभुकन तिमी चित्तमा सम्झिराख
हे योद्धा हो ! बलसँग मिची पार वैरी सखाप ।।

हे इन्द्र ! हाम्रा सब वीरको मन
उत्साहले पार सधैँ टनाटन ।
हाम्रा सबै यी हतियारमा पनि
रहोस् सधैँ पाइन ता नयैँ बनी ।।

हे वृत्रहा ! यी सब अश्वको पनि
छिटो गराऊ गतिलाई औधि नि ।
हाम्रा सबै यी रथ गड्गडाउँदै
दौडून् अरूको मुटु थर्थराउँदै ।।

वैरीहरूको बल खूप वैरिँदा
गर्जेर हामी पनि सामु जोरिँदा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

हाम्रो सुरक्षा प्रभु इन्द्रबाट होस्
हाम्रो ध्वजा उन्नत नै रहीरहोस् ।।

वैरीहरू दुर्व्यसनादिमा पनि
तम्सी सरून् पारखदार झैं बनी ।
शोकाग्निको दारुण रापले गरी
विवेक जाओस् तिनको सबै डढी ।।

हे वीर हो ! निर्भय भै सबैतिर
अगाडि जाओ वशमा जगत् गर ।
कल्याण तिम्रो प्रभु इन्द्रले गरून्
अजेय तिम्रा बल, बुद्धि, शस्त्र हून् ।।

खोजेर जोरी, मदमत्त भैकन
छन् आउँदा सम्मुख शत्रु यी जुन ।
अन्योल पारून् तिनलाइ देवता
कुना पसून हून् सब ती यताउता ।।

वि. सं. १९९१।१०।१

CC-0. Nepal Sanskrit Academy, Kathmandu

लोभी

(ऋग्वेद, ८ अष्टक ६ अध्याय २३ वर्ग)

अत्यन्त सानो मनको भए स्थिति
बेकाम हुन्छन् धनधान्य सम्पति ।
लोभी न ता धर्म न कर्म गर्दछ
आफन्तलाई कहिल्यै न हेर्दछ ।।

त्यो एकलै केवल पेट भर्दछ
त्यो सास फेर्दै शवतुल्य बन्दछ ।

वि. सं. १९९१।३।३१

CC-0. Nepal Sanskrit Academy, Kathmandu

तिम्रै निम्ति लिएर भोज्य घरमा आईरहेको म छु

(शुक्लयजुर्वेद, ३ अध्याय)

हे मेरा घरका जहानहरुहो ! शङ्का नमानीकन
चिन्ताशून्य भई रहो हृदयमा, पर्दैन क्यै आत्तिन ।
तिम्रै निम्ति लिएर भोज्य घरमा आईरहेको म छु
पुग्दामा घर भोज्यसाथ मनमा अत्यन्त सानन्द छु ।।

वि. सं २०३६।५।१०।१

(वि. सं. २०४६ मा प्रकाशित पूर्णिमा ७६ अङ्कको ५६ पृष्ठबाट)

CC-0. Nepal Sanskrit Academy, Kathmandu

हाम्रो रहोस् राष्ट्र सधैँ समुन्नत

(शुक्लयजुर्वेद, २२ अध्याय)

खोजी गरी तत्त्व, सफा गरी मन
पार्ने उज्यालो त्यसले जगत्कन ।
बनून् यहाँ ब्राह्मण शास्त्रदीक्षित
हाम्रो रहोस् राष्ट्र सधैँ समुन्नत ।।

शूरा बडा युद्ध–कला–विचक्षण
थर्काउने शत्रु–समूहका मन ।
हाम्रा यहाँ क्षत्रिय हून् महारथ,
हाम्रो रहोस् राष्ट्र सधैँ समुन्नत ।।

गाईहरू खूप यहाँ दुधालु हून्,
भारीहरू बोक्न समर्थ गोरु हून् ।
घोडाहरूको गति होस् अतिद्रुत,
हाम्रो रहोस् राष्ट्र सधैँ समुन्नत ।।

स्त्रीजाति सच्छील सुरूपका बनून्,
हाम्रा लडाका सब यी जयी रहून् ।
युवा बनून् वीर सुसभ्य शिक्षित,
हाम्रो रहोस् राष्ट्र सधैँ समुन्नत ।।

बर्सोस् यहाँ बादल चाहिँदो गरी,
सप्रून् तथा अन्न र पात बेसरी ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वृक्षादि होऊन् फल–पुष्प–शोभित,
हाम्रो रहोस् राष्ट्र सधैँ समुन्नत ।।

हामीहरूको जति जे छ यो अडोस्,
नयाँ नयाँ लाभ सधैँ भईरहोस् ।
बढ्दै रहोस् भित्र भँडार सञ्चित
हाम्रो रहोस् राष्ट्र सधैँ समुन्नत ।।

(वि. सं. १९९९ कार्तिकको शारदा ८ वर्ष ७ संख्याको ३३५ पृष्ठबाट)

CC-0. Nepal Sanskrit Academy, Kathmandu

मेरो त्यो मनले सधैँ लिइरहोस्
सत्कर्मकै भावना

(शुक्लयजुर्वेद ३४ अध्याय)

जागा भै रहने मनुष्यहरुको जो पुग्छ टाढातक,
सुत्ने मानिस आदिको पनि तथा जो पुग्छ टाढातक ।
जो ज्यादै पर पुग्छ देवसम भै, जो ज्योति हो ज्योतिमा,
मेरो त्यो मनले सधैँ लिइरहोस् सत्कर्मकै भावना ।।

जानेका सब कर्मकाण्डकन औ कर्मिष्ठ विद्वान् जन
जोद्वारा नचुकेर यज्ञविधिका गर्छन् सबै साधन ।
जो भित्रै सबको रहन्छ, छ बडो आश्चर्य जो लोकमा,
मेरो त्यो मनले सधैँ लिइरहोस् सत्कर्मकै भावना ।।

जो प्रज्ञान भनिन्छ चेत पनि औ मानिन्छ जो नै धृति,
जो भित्रै सबको रहन्छ, जुन हो कैल्यै ननिभ्ने द्युति ।
केही गर्न कतै कदाचन कुनै सक्तैन जेले विना,
मेरो त्यो मनले सधैँ लिइरहोस् सत्कर्मकै भावना ।।

पैलेका ,पछिका, यसै समयका ती ती अवस्थाकन
जो राम्रोसँग बुझ्न सक्तछ तथा मर्दैन कैल्यै जुन ।
होता सात जना हुने यजनको जो गर्छ सञ्चालना,
मेरो त्यो मनले सधैँ लिइरहोस् सत्कर्मकै भावना ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

जस्तै नाभिमहाँ अडेर रथका डण्डीहरू बस्तछन्,
त्यस्तै ऋग् यजु सामवेद जसको आधारमा अड्दछन् ।
सारा ज्ञान अडीरहेछ जसको आधारमा लोकमा,
मेरो त्यो मनले सधैं लिइरहोस् सत्कर्मकै भावना ॥

जान्ने सारथिले लगामहरुले पारेर आफ्नो वश
तेजी अश्व कुदाइदिन्छ त्यसरी जो लोक दौडाउँछ ।
ज्यादै कुद्दछ, बस्छ जो हृदयमा, पुग्दैन वृद्धत्वमा,
मेरो त्यो मनले सधैं लिइरहोस् सत्कर्मकै भावना ॥

वि. सं. २०२९।१०।२२।१

(वि. सं. २०३१ मा प्रकाशित मधुपर्क ७ वर्ष ६ अङ्कका १–३ पृष्ठबाट)

CC-0. Nepal Sanskrit Academy, Kathmandu

राजालाई आशीर्वाद

(अथर्ववेद, ३ काण्ड १ अनुवाक ४ सूक्त)

राजन् ! तिम्रो प्रबल भुजको आड यो राष्ट्र खोज्छ,
तेजस्वी ह्वौ, सकल जनता भक्ति गर्दै नुहुन्छ ।
एकच्छत्रे नरपति भई लोकलाई उज्यालो
देऊ, गाओस् जय जय भनी लोक सत्कीर्ति तिम्रो ॥

तिम्रो होओस् वरण जनताबाट राजत्वलाई,
यो होस् ज्यादै रुचिकर सबैतर्फका लोकलाई ।
अग्लो सिंहासनबिच बसी हातमा दण्ड लेऊ,
हामीलाई उचित विधिले भोज्यवस्त्रादि देऊ ॥

तिम्रो बोलावट हुन गए आइहालून् कुलीन,
होऊन् तिम्रा अतिशय छिटा दूत आगोसमान ।
तिम्रा रानी सुतहरु रहून् नित्य सन्तुष्टचित्त,
आओस् सिर्तो बहुत, नृपते ! ह्वौ तिमी खूप शक्त ॥

विश्वेदेवाः, वरुण, मरुतः, मित्र औ अश्वियुग्म
द्यौता डाकून् नरवर ! तिमीलाइ यो राज्य गर्न ।
बाँडी खाने मन गर तिमी, हातमा दण्ड लेऊ,
हामीलाई उचित विधिले भोज्यवस्त्रादि देऊ ॥

टाढा छौ तापनि अब यहाँ झट्ट नै आइहाल,
द्यावाभूमी शुभ गरिदिऊन् भूप ! तिम्रो बहाल ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तिम्रो राम्रो वरुण अहिल्यै देवलोकाधिपाल
बोल्छन्, डाक्छन् हितकर भई, राज्य छट्टै सँभाल ।।

आऊ हामी मनुजहरुको लोकमा देवराज !
राम्रो बुझ्छौं, वरुणसँगमा मिल्छ तिम्रो मिजास ।
राजन् ! डाक्छन् सुरपति, तिमी राज्यशोभा बढाऊ,
द्यौता मान्दै यजनविधिले लोकलाई सधाऊ ।।

साना ठूला सब नद नदी स्वागतार्थं प्रवृत्त
होऊन्, राम्रोसित हिँडिदिऊन्, आज तिम्रो निमित्त ।
राजन् ! होऊ प्रमुदितमना, हातमा दण्ड लेऊ,
धेरै लामो समयतक यो राज्यलाई चलाऊ ।।

वि. सं. २०३१।१०।३०।४

(वि. सं. २०३१ मा प्रकाशित पूर्णिमा ३२ अङ्कका १–८ पृष्ठ)

CC-0. Nepal Sanskrit Academy, Kathmandu

विद्यार्थी

(कठोपनिषद्, १ अध्याय १–२ वल्ली)

उहिले त्यो कुनै काल वाजश्रवसनामक ।
यशस्वी लोकविख्यात थिए कर्मठ याज्ञिक ।।
नचिकेता नामका हुन् तिनकै पुत्र बालक ।
हाम्रो यस कथामा छन् तिनै बालक नायक ।।
भोगको कामना राख्तै गर्दथे यज्ञ याज्ञिक ।
सर्वमेध गरी दान गरे सिरिखुरीतक ।।
बूढाखाडा धेर गाई तिनका घरमा थिए ।
यज्ञको दक्षिणा भन्दै ती जम्मै तिनले दिए ।।
आफ्ना पिताले यसरी बूढा गाईहरूकन ।
दान गर्दा पुत्रलाई उठ्यो श्रद्धा–विवेचन ।।
ढल्लान् ढल्लान् भनेजस्ता गाई दान गरीकन ।
पुण्यचाहिँ परै जाओस् बरु आउँछ दुर्दिन ।।
मलाई नै पिताजीले बरु दान गरी दिए ।
अनिष्ट टर्थ्यो, यो भाव तिनले मनमा लिए ।।
यै चिन्ताले ग्रस्त भई पिताको हित होस् भनी ।
बिन्ती गरे पितालाई तिनले विनयी बनी ।।
"बाबा मलाई कसको हातमा सुम्पिबक्सने ।
हजूरको इरादा छ ?" यी कुरा पुत्रले भने ।।
छोराको यो कुरालाई सुनेको नसुन्यै गरी ।
आफ्नो कामतिरै लागे वाजश्रवस त्यो घडी ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

नचिकेता गर्न लागे ढिपी लिई पितासित ।
त्यही कुरा, पिताचाहिँ भए झन् क्रोधमूर्च्छित ।।

रिसका झोकमा झट्ट पिताको मुखबाट नै ।
निस्क्यो कठोर दुर्वाच्य पुत्रको माथि वज्र झैँ ।।

"तँलाई मृत्युको हात सुम्पन्छु" भनि गौतम ।
रिसले दन्दनाएर लागे उफ्रेर कुर्लन ।।

पिताका यी कुरा सुन्दा भई अत्यन्त विह्वल ।
पुगे एक्कासि ती बाल चिन्तासागरको तल ।।

यी यत्तिका पिताजीका छात्रमध्ये सधैँ म नै ।
पहिलो छु, हरे ! केले बज्र्यो वज्र ममाथि नै ।।

पहिला हुन् अरू नै लौ, म हुँ मध्यम छात्र नै ।
तथापि गर्थे गुरुको सेवा भक्ति त पूर्ण नै ।।

मृत्युलाई काम कुन लाग्नेछु म हरे शिव !
पिताजीले क्रोधवश बोल्नुभो व्यर्थमा सब ।।

जे जे भयो सब गयो, गएको त्यो कुरा किन ?
अनिष्ट टार्ने जुक्तिमा पर्छ लाउनु यो मन ।।

असत्यले पिताजीको कुनै हानि भयो भने ।
लाखौँ वर्ष म बाँचेमा पनि के लाभ हो हुने ।।

यिनै कुरा सब गुनी नचिकेता पिताकन ।
भन्न लागे हात जोडी गरेर बलियो मन ।।

"उम्रनु पाक्नु औ झर्नु धानको त स्वभाव हो ।
जन्मनु बढ्नु औ मर्नु मर्त्यको नित्य धर्म हो ।।

अघिका ती सबै लागे जुन बाटो लिईकन ।
त्यही बाटो लिई लोक जाँदैछन् यो धमाधम ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

त्यही बाटो जान लागें बाबा चिन्ता नगर्नुहोस् ।
संसारको चक्रगति राम्रोसँग निहार्नुहोस् ।। "

कुरा यति गरी धीर साहसी वीर बालक ।
भय छोडीकन पुगे मृत्युको दहिलोतक ।।

नचिकेता तीन दिन त्यहीं ढोका कुरीकन ।
बसे, चौथो दिवसमा कुरा सब सुनीकन ।।

अग्नि झैँ तेजिला विप्र आफ्ना अतिथि भैकन ।
आएका छन्, स्वागत ता पर्दथ्यो गर्नु तत्क्षण ।।

जसको घरमा भोकै पर्छन् अतिथि ब्राह्मण ।
त्यसको धर्म–कर्मादि नष्ट हुन्छन् प्रतिक्षण ।।

यही चिन्ता लिई मृत्यु आफैं आई सरासर ।
नचिकेतालाइ भन्छन् देखाईकन आदर ।।

मृत्यु—

मेरो यो घरमा भोकै बसेछौ तीन रात यो ।
मैले पर्थ्यो सबै गर्नु तिम्रो स्वागत राम्ररी ।।

मेरो चूक भयो बाबु, यो कुरालाई छाडिद्यौ ।
मनलाग्दो कुरा माग वर तीन म दिन्छु ल्यौ ।।

नचिकेता—

मेरो उपरको क्रोध पिताजीको सबै हटोस् ।
स्नेह बढ्दै गई शान्ति उहाँको मनमा रहोस् ।।

हजूरको यहाँबाट फर्कँदामा चिनीकन ।
बोलाउनोस् पिताजीले लिएर कमलो मन ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

मृत्यु—

मृत्युको दहिलोदेखि फर्केका निज पुत्रको ।
मुख देखी पिता तिम्रा चाख्नेछन् स्वाद स्नेहको ।।
अघिजस्तै पिता तिम्रा ठण्डा दिल लिईकन ।
नीदको मधुरो स्वाद बुझ्नेछन् अब तत्क्षण ।।

नचिकेता—

स्वर्गमा भय नै हुन्न, न ता हजुरकै भय ।
बुढ्याइँको न ता, भोक प्यासदेखि कुनै भय ।।
शोक दुःखादिले हीन सदा अमर जीवन ।
पाइन्छ स्वर्गमै मात्र, भन्दछन् यी सबै जन ।।
हजूरलाई हे मृत्यु ! त्यो स्वर्ग सब याद छ ।
त्यो स्वर्ग पाउने यज्ञ पढ्न पाऊँ मि बिन्ति छ ।।

मृत्यु—

जुन यज्ञ गरी स्वर्ग पाइन्छ त्यस यज्ञका ।
बताइदिन्छु यी गूढ रहस्य सब भित्रका ।।

कुरा यति गरी भित्री रहस्य सब यज्ञका ।
बताए मृत्युले खोल्दै तत्त्व तत्त्व विधानका ।।
मृत्युदेखिन् यज्ञ--विधि पढ्दै गुन्दै डुबी तल ।
सुनाउँदै गए पाठ नचिकेता सरासर ।।
शिष्यको योग्यता देखी महात्मा मृत्युले पनि ।
भन्दै गए भित्रदेखि प्रत्यन्तै रसिलो बनी ।।

मृत्यु—

यो यज्ञ, बाबु ! तिम्रो नै नामले मर्त्यलोकमा ।
चल्नेछ, तिम्रो प्रख्याति हुनेछ अब विश्वमा ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

नचिकेता–यज्ञलाई तीन फेरा गरीकन ।
मृत्युको फेरमा फेरि कैल्यै पर्दैन जन्मिन ।।
तिमीलाई भयो माला, यो माला दिव्य वस्तु हो ।
बाबु ! तेस्रो कुरा माग, तिमीलाई दिनेछु त्यो ।।

नचिकेता—

आत्मा कदापि मर्दैन यो शरीर मरे पनि ।
भन्ने कुरा कुनै गर्छन् यै हो सिद्धान्त नै भनी ।।
मरेपछि कुनै भन्छन् सिद्धियो सब टुङ्गियो ।
आत्मा त्यो कल्पना नै हो जो गयो त्यो गयो गयो ।।
यस्तो हुँदा भित्रदेखि ठूलो सन्देह उठ्तछ ।
यो के हो बुझ्न पाऊँ म, मेरो यै एक बिन्ति छ ।।

मृत्यु—

देवताहरूले एकपल्ट ठूलो गरी खल ।
खोजेथे यसको तत्त्व, पाएनन् तिनले तर ।।
अत्यन्त मसिनो यो छ बुझ्नै पनि कठोर छ ।
चिन्ताको भुँमरीभित्र डुबेरै बस्नुपर्दछ ।।
दिन्छु बाबु ! तिमीलाई अरू जे वस्तु माग्दछौ ।
कठोर तर्कको बोझ्रा व्यर्थमै किन बोक्तछौ ।।

नचिकेता—

देवताहरूलाई छ जसमा भ्रम धर्मर ।
हजूर नै भन्नुहुन्छ, यो कुरा छ निकै तल ।।
हजूरलाइ छोडेर अर्को को गुरु पाउँला ?
जसले भित्रको गाँठो राम्रोसँग फुकाउला ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

मेरो यो भित्रको प्यास यसैले मात्र मर्दछ ।
अर्को कुनै कुरै छैन जसले त्यो रसाउँछ ।।

मृत्यु—

विशाल राज्य तिम्रो होस्, इच्छामरण होस् तथा ।
तिम्रो ढुकुटिमा पूर्ण धनधान्य रहोस् सदा ।।
छोरा नातिहरू बाँचून् सुखी भै शत वत्सर ।
तिम्रो महलमा नित्य रहोस् सर्वत्र मङ्गल ।।
हात्ती घोडा रथ तथा गाई बाखाहरू पनि ।
चाहिए जति हून् पूर्ण, नहोस् केही कतै कमी ।।
मधुरो स्वरको गाना तिम्रो महलमा गुँजोस् ।
सुन्दरीहरुको हास्य लास्यसाथ गुँजीरहोस् ।।
सितीमिती भोग यति पाइन्नन् मर्त्यलोकमा ।
दिन्छु बाबु ! तिमीलाई गर आनन्द राज्यमा ।।
मरेपछिको त्यो चिन्ता कल्पना सब छाडियौ ।
जिउँदैको मोज–मजा आनन्द रस चाखिल्यौ ।।

नचिकेता—

सारा इन्द्रियको शक्ति भोगले नै घटाउँछ ।
भोगले तिर्सनालाई भने खूप बढाउँछ ।।
लम्बे जतिसुकै आयु पाएमा पनि तिर्सना ।
टुङ्गिन्न, दन्दनाएर दन्किँदै जान्छ चित्तमा ।।
पैसा जतिसुकै पाओस् हुन्न सन्तुष्ट मानिस ।
असन्तोषाग्निले उल्टो पिल्सिँदै जान्छ मानस ।।
हजूरको दुर्लभ यो पाइयो आज दर्शन ।
भने अवश्य नै मिल्ला हातको मल त्यो धन ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

हजूरको कृपा यत्रो हामीमाथि छँदैछ त ।
बाँचौंला नि हजूरको प्रतापाग्नि बलेतक ।।
अहिले नाच गाना र हात्ती घोडा यहीँ रहून् ।
त्यै प्रश्नको विषयमा मात्र हाम्रा कुरा चलून् ।।
मेरो धोको त्यही एक त्यसैमा सास अड्दछ ।
अर्को कुनै कुरो छैन जसमा आश लाग्दछ ।।
अजरामर ती देव देख्तादेख्तै समीपमा ।
बूढो भएर मर्ने त्यो मर्त्य के शान्ति चित्तमा ।।
अडाओस्, कसरी आशा मनमा त्यसले धरोस् ।
आफ्नो त्यो हीनतालाई के संझीकन बिर्सियोस् ।।
बाहिरे रङ्गमा मात्र जो छ निःसार चञ्चल ।
रमाओस् धैर्यवान् मर्त्य के सम्झीकन आखिर ।।
लामो जीवन पाएर त्यो जराग्रस्त मर्त्यले ।
के के पौरुष गर्ला र खोजोस् त्यैकन हर्षले ।।
छ छैन भन्ने जसमा ठूलो शङ्का त उठ्तछ ।
जोभन्दा गतिलो प्रश्न हुनै पनि कठोर छ ।।
त्यै तत्त्वमा मात्र एक आशा यो भित्र लाग्छ बि ।
नचिकेता अरू वस्तु चाहँदैन कुनै पनि ।।

मृत्यु—

संसारमा श्रेय तथा प्रेय यी दुइ मार्ग छन् ।
दुइटा यी मार्गबाट दुनियाँ सब हिँड्दछन् ।।
यताउति सबै हेरी निहारेर जगत्स्थिति ।
मनस्वी प्रेय छाडेर पक्रन्छ श्रेयकै गति ।।
सामान्य जनताचाहिँ श्रेयलाई निकै पर ।
भित्रैदेखि हटाएर लम्कन्छ प्रेयकै तिर ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रेयको मार्गले जाने आखिरी श्रेय पाउँछ ।
प्रेयको मार्गले जाने बीचैमा लर्बराउँछ ।।
विद्याको मार्ग हो श्रेय, अविद्यामार्ग प्रेय हो ।
विद्याको चाहना राख्ने गर्दछन् प्रेम श्रेयको ।।
त्यस्ता त्यस्ता प्रिय कुरा जसमा धेर मानिस ।
भित्रैदेखि लोभिएर लाउँछन् नित्य मानस ।।
छोड्यौ तो अहिले बाबु, तिमीले तृण झैँ गरी ।
विद्यार्थी हौ तिमी भन्ने बुझेँ मैले त राम्ररी ।।
यस्तो प्रश्न उठाएर अरू को अड्न सक्तथ्यो ?
तिमीजस्ता शिष्य भए ज्ञानको मार्ग खुल्दथ्यो ।।
बालकै छौ तिमी बाबु ! तिम्रो धैर्य अगाध छ ।
यसै हुँदा गूढ प्रश्न तिमीलाई सुहाउँछ ।।
तिमीलाई खुलेको छ विद्याको द्वार त्यो खुला ।
भन्ने मेरो छ विश्वास सुन्दा तिम्रा यिनै कुरा ।।
जसलाई वेद पनि संझन्छन् प्रतिपाद्य हो ।
नैष्ठिक स्नातकहरू खोज्दछन् जसको जरो ।।
जसको आशले घुम्छन् यी तपस्वीहरू वन ।
त्यो तत्त्व हो यही बाबु ! मन लाई तिमी सुन ।।

(वि. सं. २००७ मा प्रकाशित पुरुषार्थ १ वर्ष ८ सङ्ख्याका २७६–२७८ पृष्ठ
र पुरुषार्थ १ वर्ष १० सङ्ख्याका ३०२–३०४ पृष्ठबाट)

CC-0. Nepal Sanskrit Academy, Kathmandu

केलाउँदै सब कुरा आत्मा नै खोज्नुपर्दछ

(बृहदारण्यकोपनिषद्, ४ अध्याय ५ ब्राह्मण)

कात्यायनी र मैत्रेयी गृहिणी याज्ञवल्क्यका ।
थिए, कात्यायनी गर्थिन् कुरा घरगृहस्थका ।।
मैत्रेयीको थियो बुद्धि शास्त्रद्वारा परिष्कृत ।
आफ्ना कुरा तिनी गर्थिन् तर्कबाट प्रतिष्ठित ।।
तीनै आश्रमको राम्रो गरी पालन, आखिर ।
अल्झिएको भित्र गाँठो फुन भैकन तत्पर ।।
सौता सौता दुवैलाई छुट्ट्याईकन प्रेमले ।
चौथो आश्रममा जाने इच्छा ली याज्ञवल्क्यले ।।
आफ्नो इच्छा दुवैलाई सुनाई प्रेमपूर्वक ।
मैत्रेयीको मुखतिर हेरे भैकन उत्सुक ।।
पतिले घर छाडेर संन्यासैतिर लम्कन ।
देखता मसक्क अँटेको गुनीकन मनैमन ।।
भित्रैदेखि उठेको त्यो नसक्ता रोक्न भावना ।
मैत्रेयीले भनिन् केही लिई गम्भीर चिन्तना ।।

मैत्रेयी—

सुनैले छापिएको यो सम्पूर्ण पृथिवीतल ।
मेरो भयो भने हूँला के म ता अजरामर ।।

याज्ञवल्क्य—

पुगीसरी पुगेका यी धनी मानिसकै सरी ।
तिम्रो जीवन बित्नेछ सुखपूर्वक राम्ररी ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

धनी होस् वा गरीबै होस् मर्त्यले मर्नुपर्दछ ।
अजम्मरी हुने आशा धनद्वारा फजूल छ ।।

मैत्रेयी—

जसलाई लिई आज भोलि नै छोड्नुपर्दछ ।
जत्तिसुकै भोग गरे पनि मर्नै त पर्दछ ।।
भने त्यही वस्तुलाई लिएर त म के गरूँ ?
अजम्मरी हुने केही उपाय छ भने सुनूँ ।।

याज्ञवल्क्य—

प्यारो कुरा तिमी गर्छ्यौ अत्यन्त रसिली बनी ।
बस आऊ नजीकैमा, सुन मेरा कुरा तिमी ।।
मेरा कुरा सब सुनी खेलाऊ भित्र चित्तमा ।
आफ्ना आँखाहरू राख अब आफ्नै समीपमा ।।
पतिको निम्तिमा हुन्न पतिको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ पतिमा प्रेम वास्तव ।।
पत्नीको निम्तिमा हुन्न पत्नीको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ पत्नीमा प्रेम वास्तव ।।
छोराको निम्तिमा हुन्न छोराको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ छोरामा प्रेम वास्तव ।।
धनको निम्तिमा हुन्न धनको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ धनमा प्रेम वास्तव ।।
पशुको निम्तिमा हुन्न पशुको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ पशुमा प्रेम वास्तव ।।
ब्रह्मको निम्तिमा हुन्न ब्रह्मको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ ब्रह्ममा प्रेम वास्तव ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

क्षत्रको निम्तिमा हुन्न क्षत्रको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ क्षत्रमा प्रेम वास्तव ।।
लोकको निम्तिमा हुन्न लोकको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ लोकमा प्रेम वास्तव ।।
द्यौताको निम्तिमा हुन्न द्यौताको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ द्यौतामा प्रेम वास्तव ।।
वेदको निम्तिमा हुन्न वेदको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ वेदमा प्रेम वास्तव ।।
प्राणीको निम्तिमा हुन्न प्राणीको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ प्राणीमा प्रेम वास्तव ।।
कसैको निम्तिमा हुन्न कसैको प्रेम गौरव ।
आफ्नो नै निम्तिमा हुन्छ सबैमा प्रेम वास्तव ।।
आफ्नै विषयमा धेर कुरा ती सुन्नुपर्दछ ।
आफ्नै कुरा सब गुनी राम्ररी बुझ्नुपर्दछ ।।
खेलाउँदै सब कुरा भित्र हेर्नै त पर्दछ ।
हे मैत्रेयी हेर्नु पनि आफैँलाई त पर्दछ ।।
सुनी बुझी गुनी हेर्न आफैँलाई त सक्छ जो ।
संसारको सबै तत्त्व राम्रै सँग त बुझ्छ त्यो ।।
आफूलाई अलग्गै नै ब्रह्मदेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका ब्रह्मदेखिन् त खान्छ त्यो ।।
आफूलाई अलग्गै नै क्षत्रदेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका क्षत्रदेखिन् त खान्छ त्यो ।।
आफूलाई अलग्गै नै लोकदेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका लोकदेखिन् त खान्छ त्यो ।।
आफूलाई अलग्गै नै द्यौतादेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका द्यौतादेखिन् त खान्छ त्यो ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

आफूलाई अलग्गै नै वेददेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका वेददेखिन् त खान्छ त्यो ।।
आफूलाई अलग्गै नै प्राणीदेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका प्राणीदेखिन् त खान्छ त्यो ।।
आफूलाई अलग्गै नै सबैदेखिन् त ठान्छ जो ।
अवश्य नै बडो धोका सबैदेखिन् त खान्छ त्यो ।।
यही ब्रह्म यही क्षत्र यिनै लोक र देव यी ।
यिनै वेद यिनै प्राणी आत्मा यी सब वस्तु हुन् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

विश्रान्ति

वैदिक खण्डको परिशिष्ट

[ऋग्वेद, शुक्लयजुर्वेद, अथर्ववेद, कठोपनिषद् तथा शतपथब्राह्मणका केही भाव लिई बनाइएका पद्य माथि परेका छन् । ती पद्यमा मूलको भाव कुन रूपमा आएका छन् भन्ने बुझ्न जिज्ञासुहरूलाई सजिलो परोस् भनी सम्बद्ध वैदिक अंश यो परिशिष्टमा दिइएका छन् । यहाँ ऋग्वेद तथा अथर्ववेदका अंशमा सायणको भाष्य र शुक्लयजुर्वेदका अंशमा उव्वटको भाष्य पनि दिइएका छन् ।]

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

माधुर्यं छाईरहोस्

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥६॥

मधु । वाताः । ऋतऽयते । मधु । क्षरन्ति । सिन्धवः । माध्वीः । नः । सन्तु । ओषधीः ॥६॥

ऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय वाताः वायवः मधु माधुर्योपेतं कर्मफलं क्षरन्ति वर्षन्ति प्रयच्छन्तीत्यर्थः । तथा सिन्धवः स्यन्दनशीला नद्यः समुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरन्ति । एवं नः अस्मभ्यम् ओषधीः फलपाकान्ता ओषधयस्ताश्च माध्वीः माधुर्योपेताः सन्तु भवन्तु ॥ मधु । अस्मादुत्तरस्य मत्वर्थीयस्य 'लुगकारेकाररेफाश्च वक्तव्याः' (पाणिनिः ४।४।१२८) इति लुक् । ऋतायते । ऋतमात्मन इच्छति । 'सुप आत्मनः क्यच्' (पाणिनिः ३।१।८), 'न च्छन्दस्यपुत्रस्य' (पाणिनिः ७।४।३५) इति ईत्वदीर्घयोर्निषेधः । अन्येषामपि संहितायां दीर्घत्वम् । क्यजन्तात् लटः शतृ । 'शतुरनुमो नद्यजादी' (पाणिनिः ६।१।१७३) इति विभक्तेरुदात्तत्वम् । माध्वीः । 'मधोरञ् च' (पाणिनिः ४।४।१२९) इति मत्वर्थीयः अञ्प्रत्ययः । 'ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि' (पाणिनिः ६।४।१७५) इति अञि* यणादेशो निपात्यते । 'वा छन्दसि' (पाणिनिः ६।१।१०६) इति पूर्वसवर्णदीर्घत्वम् । ओषधीः । ओषः पाकः आसु धीयते इति ओषधयः । 'कर्मण्यधिकरणे च' (पाणिनिः ३।३।९३) इति किप्रत्ययः । 'कृदिकारादक्तिनः' (पाणिनिः ४।१।३१) इति ङीष् । जसि पूर्ववत् पूर्वसवर्णदीर्घः । दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वम् । तच्च घञन्तमाद्युदात्तम् ॥

---

* अणि इति काशिका ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ।।७।।

मधु । नक्तम् । उत । उषसः । मधुऽमत् । पार्थिवम् । रजः । मधु । द्यौः । अस्तु । नः । पिता ।।७।।

नक्तं रात्रिः नः अस्माकं मधु मधुमती माधुर्योपेतफलप्रदा भवतु । उत अपि च उषसः उषःकालोपलक्षितान्यहानि च मधुमन्ति भवन्तु । पार्थिवं रजः पृथिव्याः सम्बन्धी लोकोऽस्माकं मधुमत् माधुर्यविशिष्ट-फलयुक्तो भवतु । पिता वृष्टिप्रदानेन सर्वेषां पालयिता द्यौः द्युलोकोऽपि मधु मधुयुक्तः भवतु ।। पार्थिवम् । 'पृथिव्या ञाञौ' (पाणिनिः ४।१। ८५) इति प्राग्दीव्यतीयः अञ्प्रत्ययः । रजः । रजःशब्दो लोकवाची । 'लोका रजांस्युच्यन्ते' (निरुक्तम् ४।१९) इति यास्कः । रजन्त्यस्मिन् जना इति रजः । असुनि 'रजकरजनरजःसूपसंख्यानम्' (पाणिनिः ६।४।२४) इति रञ्जेर्नलोपः ।।

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ।।८।।

मधुऽमान् । नः । वनस्पतिः । मधुऽमान् । अस्तु । सूर्यः । माध्वीः । गावः । भवन्तु । नः ।।८।।

नः अस्माकं वनस्पतिः वनानां पालयिता यूपाभिमानी देवः मधुमान् माधुर्योपेता फलवान् अस्तु । तादृशं फलमस्मभ्यं प्रयच्छत्विति-त्यर्थः । सूर्यः सर्वस्य प्रेरकः सविता च मधुमान् अस्तु । गावः अग्नि-होत्राद्यर्था धेनवश्च नः अस्माकं माध्वीः माधुर्योपेतेन पयसा युक्ताः भवन्तु ।। वनस्पतिः । वनानां पतिर्वनस्पतिः । पारस्करादित्वात् सुट् । वनपतिशब्दावाद्युदात्तौ । 'उभे वनस्पत्यादिषु युगपत्' (पाणिनिः ६।२। १४०) इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ।।

(ऋग्वेद १ अष्टक, ६ अध्याय, १८ वर्ग; शुक्लयजुर्वेद १३ अध्याय २७–२९ ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

उषा

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥१॥

इदम् । श्रेष्ठम् । ज्योतिषाम् । ज्योतिः । आ । अगात् । चित्रः । प्रऽकेतः । अजनिष्ट । विऽभ्वा । यथा । प्रऽसूता । सवितुः । सवाय । एव । रात्री । उषसे । योनिम् । अरैक् ॥१॥

ज्योतिषां ग्रहनक्षत्रादीनां द्योतमानानां मध्ये इदम् उषआख्यं ज्योतिः श्रेष्ठं प्रशस्यतमम् । अस्य कोऽतिशय इति चेत् उच्यते । नक्षत्रादिकं ज्योतिः स्वात्मानमेव प्रकाशयति नान्यत् । चन्द्रस्तु यद्यप्यन्यत् प्रकाशयति तथापि न विस्पष्टप्रकाशः । औषसं तु ज्योतिः युगपदेव सर्वस्य जगतः अन्धकारनिराकरणेन विशेषेण प्रकाशकम् । अतः प्रशस्यतममित्यर्थः । तादृशं ज्योतिः आगात् पूर्वस्यां दिश्यागमत् । आगते च तस्मिन् चित्रः चायनीयः प्रकेतः अन्धकारावृतस्य सर्वस्य पदार्थस्य प्रज्ञापकः तदीयो रश्मिः विभ्वा विभुर्व्याप्तः सन् अजनिष्ट प्रादुरभूत् । किंच यथा रात्री रात्रिः स्वयं सवितुः सूर्यसकाशात् प्रसूता उत्पन्ना । सूर्यो हि अस्तं गच्छन् रात्रिं जनयति । तस्मिन्ननस्तमिते रात्रेरुत्पत्त्यभावात् । एवमेव रात्रिरपि उषसे सवाय उषस उत्पत्तये तदर्थं योनिस्थानं स्वकीयापरभागलक्षणम् अरैक् आरेचितवती कल्पितवतीत्यर्थः । यद्वा । प्रसूता रात्रिसकाशादुत्पन्नोषाः सवितुः सूर्यस्य सवाय प्रसवाय जन्मने यथा भवति एवं रात्रिरपि उषसे उषसो यज्जन्म तदर्थं योनिं स्वापरभागलक्षणं स्थानं कृतवती । अत्र निरुक्तम्– 'इदं श्रेष्ठं ज्योतिषां ज्योतिरागमत् चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानम्' (निरुक्तम् २।१९) इति ॥ श्रेष्ठम् । प्रशस्यशब्दात् आतिशायनिकः इष्ठन् । 'प्रशस्यस्य श्रः' (पाणिनिः ५।३।६०) इति श्रादेशः 'प्रकृत्यैकाच्' (पाणिनिः ६।४।१६३) इति प्रकृतिभावात् टिलोपाभावः । अगात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

एतेः लुङि 'इणो गा लुङि' (पाणिनिः २।४।४५) इति गादेशः। 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' (पाणिनिः २।४।७७) इति सिचो लुक्। प्रकेतः। 'कित ज्ञाने'। अन्तर्भावितण्यर्थात् कर्मणि घञ्। 'थाथघञ्क्ताजबित्रकाणाम्' (पाणिनिः ६।२।१४४) इति उत्तरपदान्तोदात्तत्वम्। अजनिष्ट। 'जनी प्रादुर्भावे'। लुङि सिच इडागमः। विभ्वा। 'विप्रसंभ्यो ड्वसंज्ञायाम्' (पाणिनिः ३।२।१८०) इति भवतेः डुप्रत्ययः। 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इत्यनेन सोः आकारादेशः। 'ओः सुपि' (पाणिनिः ६।४।८३) इति यणादेशस्य 'न भूसुधियोः' (पाणिनिः ६।४।८५) इति प्रतिषेधे प्राप्ते 'छन्दस्युभयथा' (पाणिनिः ६।४।८६) इति यणादेशः। व्यत्ययेनाद्युदात्तत्वम्। यद्वा। विपूर्वात् भवतेः औणादिको डुन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। प्रसूता। 'षूङ् प्राणिप्रसवे'। कर्मणि निष्ठा। 'गतिरनन्तरः' (पाणिनिः ६।२।४९) इति गतेः प्रकृतिस्वरत्वम्। सवाय। 'छन्दसि जवसवौ वक्तव्यौ' (पाणिनिः ३।३।५६) इति निपातनात् अच्। चित्त्वादन्तोदात्तत्वम्। 'अणोऽप्रगृह्यस्यानुनासिकः' (पाणिनिः ८।४।५७) इति संहितायाम् अकारः सानुनासिकः। एव। 'निपातस्य च' (पाणिनिः ६।३।१३६) इति संहितायां दीर्घः। रात्री। 'रात्रेश्चाजसौ' (पाणिनिः ४।१।३१) इति ङीप्। 'यस्येति च' (पाणिनिः ६।४।१४८) इति इकारलोपः। अरैक्। 'रिचिर् विरेचने'। लङि 'बहुलं छन्दसि' (पाणिनिः २।४।७३) इति विकरणस्य लुक्। लघूपधगुणे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' (पाणिनिः ६।१।६८) इति तिलोपः। वर्णव्यापत्त्या व्यत्ययेन एकारस्य ऐकारः॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने॥२॥

रुशत्ऽवत्सा। रुशती। श्वेत्या। आ। अगात्। अरैक्। ॐ इति। कृष्णा। सदनानि। अस्याः॥ समानबन्धू इति समानऽबन्धू। अमृते इति। अनूची इति। द्यावा। वर्णम्। चरतः। आमिनाने इत्याऽमिनाने॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

श्वेत्या इत्युषसो नामधेयम् । रुशती दीप्ता श्वेत्या श्वेतवर्णोषाः । रुशद्वत्सा रुशन् दीप्तः सूर्यो वत्सो यस्याः सा तथोक्ता । यथा मातुः समीपे वत्सः संचरति एवमुषसः समीपे सूर्यस्य नित्यम् अवस्थानात्त-द्वत्सत्वम् । अथवा यथा वत्सो मातुः स्तन्यं रसं पिबन् हरति एवमुष-सोऽवश्यायाख्यं रसं पिबन् वत्स इत्युच्यते । तादृशी सती आगात् आगतवती । आगतायाः अस्याः उषसः कृष्णा कृष्णवर्णा रात्रिः सदनानि स्थानानि स्वकीयान्त्यार्धयामलक्षणानि अरैक् आरेचितवती कल्पितवती दत्तवतीत्यर्थः । उ इत्येतत् पादपूरणम् । अपि चैते रात्र्युषसौ समान-बन्धू समानेनैकेन सूर्याख्येन बन्धुना सख्या युक्ते । यद्वा । सूर्येण सह संबद्धे । यथोषाः उदेष्यता सूर्येण संबद्धा एवं रात्रिरपि अस्तं यता सूर्येण संबद्धा । अमृते मरणरहिते कालात्मकतया नित्यत्वात् अनूची अन्वञ्चन्त्यौ । प्रथमं रात्रिः पश्चादुषा इत्यनेन क्रमेण गच्छन्त्यौ । यद्वा । सूर्यगत्यनुसारेण गच्छन्त्यौ । एवंभूते वर्णं सर्वेषां प्राणिनां रूपम् आमि-नाने जरयन्त्यौ । यद्वा । स्वकीयं रूपं हिंसन्त्यौ । उषसा नैशं तमो निवर्त्यते प्रकाशात्मकमुषसो रूपं रात्र्या । एवंविधे सत्यौ द्यावा द्योतमाने चरतः प्रतिदिवसमावर्तेते । यद्वा । द्यावा नभसा अन्तरिक्ष-मार्गेण चरतः प्रतिदिवसं गच्छतः । अत्र निरुक्तम्— 'रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः । सूर्यमस्या वत्समाह साहचर्या-द्रसहरणाद्वा । रुशती श्वेत्यागात् श्वेत्या श्वेततेररिच्वत्कृष्णा सदना-न्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णः । अथैने संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची अनूच्यावितीतरे-तरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे' (निरुक्तम् २।२०) इति ॥ श्वेत्या । 'श्विता वर्णे' । अस्मात् ण्यन्तात् 'अचो यत्' (पाणिनिः ३।१।९७) इति भावे यत् । णिलोपः । अर्शआदित्वात् मत्वर्थीयः अच् । अमृते । मृतं मरणमनयोर्नास्तीति बहुव्रीहौ 'नञो जरमरमित्रमृताः' (पाणिनिः ६।२।११६) इत्युत्तर-पदाद्युदात्तत्वम् । अनूची । अनुपूर्वादञ्चतेः 'ऋत्विग्दधृक्स्रग्दिगुष्णि-गुञ्चुयुजिक्रुञ्चां च' (पाणिनिः ३।२।५९) इत्यनेन क्विन् । 'अनिदितां

CC-0. Nepal Sanskrit Academy, Kathmandu

हल उपधायाः क्ङिति' (पाणिनिः ६।४।२४) इति नलोपः। 'अञ्चते-श्चोपसंख्यानम्' (पाणिनिः ४।१।६) इति ङीप्। 'अचः' (पाणिनिः ६।४।१३८) इत्यकारलोपे 'चौ' (पाणिनिः ७।३।१३८) इति दीर्घः। 'अनुदात्तस्य च यत्रोदात्तलोपः' (पाणिनिः ६।१।१६१) इति ङीप उदात्तत्वम्। 'सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्याजालः' (पाणिनिः ७।१।३९) इति विभक्तेर्लुक्। आमिनाने। 'मीङ हिंसायाम्'। क्र्यादिकः। शानचि 'मीनातेर्निगमे' (पाणिनिः ७।३।८१) इति ह्रस्वत्वम्॥

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे॥३॥

समानः। अध्वा। स्वस्रोः। अनन्तः। तम्। अन्याऽअन्या। चरतः। देवशिष्टे इति देवऽशिष्टे। न। मेथेते इति। न। तस्थतुः। सुमेके इति सुऽमेके। नक्तोषसा। सऽमनसा। विरूपे इति विऽरूपे॥३॥

स्वस्रोः भगिन्योः रात्र्युषसोः अध्वा संचरणसाधनभूतो मार्गः समानः एक एव। येनैव आकाशमार्गेणोषा निर्गच्छति तेनैव रात्रिरपि। स च मार्गः अनन्तः अवसानरहितः। तं मार्गं देवशिष्टे देवेन द्योतमानेन सूर्येण अनुशिष्टे शिक्षिते सत्यौ अन्यान्या एकैका चरतः क्रमेण गच्छतः। अपि च सुमेके शोभनमेहने सर्वेषामुत्पादकत्वात् शोभनप्रजनने नक्तोषासा रात्रिरुषाश्च विरूपे तमःप्रकाशलक्षणाभ्यां विरुद्धरूपाभ्यां युक्ते अपि समनसा समानमनस्के ऐकमत्यं प्राप्ते सत्यौ न मेथेते परस्परं न हिंस्तः। तथा न तस्थतुः क्वचिदपि न तिष्ठतः। सर्वदा लोकानुग्रहार्थं गच्छतः इत्यर्थः॥ अन्यान्या। 'कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलम्' (पाणिनिः ८।१।१२) इति अन्यशब्दस्य द्विर्भावः। 'तस्य परमाम्रेडितम्' (पाणिनिः ८।१।२) इति आम्रेडितसंज्ञायाम् 'अनुदात्तं च' (पाणिनिः ८।१।३) इति आम्रेडितानुदात्तत्वम्। देवशिष्टे। 'शासु अनुशिष्टौ'। अस्मात् कर्मणि निष्ठा। 'यस्य विभाषा' (पाणिनिः ७।२।१५) इति इट्प्रतिषेधः।

CC-0. Nepal Sanskrit Academy, Kathmandu

'शास इदङ्हलोः' (पाणिनिः ६।४।३४) इति उपधाया इत्वम् । 'शासिवसिघसीनां च' (पाणिनिः ८।३।६०) इति षत्वम् । 'तृतीया कर्मणि' (पाणिनिः ६।२।४८) इति पूर्वपदप्रकृतिस्वरत्वम् । मेथेते । 'मिथृ मेथृ मेधाहिंसनयोः' । भौवादिकः । अनुदात्तेत् । सुमेके । 'मिह सेचने' । भावे घञ् । शोभनो मेहो ययोस्ते । व्यत्ययेन ककारः । उत्तरपदस्य ञित्स्वरेणाद्युदात्तत्वम् । 'आद्युदात्तं द्व्यच्छन्दसि' (पाणिनिः ६।२।११९) इत्युत्तरपदाद्युदात्तत्वम् । नक्तोषासा । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति विभक्तेराकारः । 'अन्येषामपि दृश्यते' (पाणिनिः ६।३।१३७) इति संहितायामुपधादीर्घः ।।

भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्राप्यो जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ।।४।।

भास्वती । नेत्री । सूनृतानाम् । अचेति । चित्रा । वि । दुरः । नः । आवरित्यावः । प्रऽअर्प्य । जगत् । वि । ॐ इति । नः । रायः । अख्यत् । उषाः । अजीगः । भुवनानि । विश्वा ।।४।।

भास्वती विशिष्टप्रकाशनयुक्ता । सूनृतेति वाङ्नाम । सूनृतानां वाचां नेत्री उत्पादयित्री । उषसः प्रादुर्भावानन्तरं हि पशुपक्षिमृगादयः सर्वे शब्दं कुर्वन्ति । एवंभूता उषाः अचेति अस्माभिः अज्ञायि । चित्रा चायनीया ज्ञाता सा नः अस्माकं दुरः द्वाराणि तमसा तिरोहितानि वि आवः व्यवृणोत् । यथास्माभिर्दृश्यन्ते तथा तमो निवार्य प्रकाशयतीत्यर्थः । अपि च जगत् सर्वं भुवनं प्राप्य प्रकाशं गमयित्वा नः अस्माकं रायः धनानि वि अख्यत् विशिष्टप्रकाशनयुक्तान्यकरोत् । उ इत्येतत् पादपूरणम् । सैषा उषाः विश्वा भुवनानि सर्वाणि भुवनानि तमसा तिरोहितत्वेन अविद्यमानकल्पानि अजीगः उद्गिरति स्वमुखान्निर्गमयति । स्वकीयेन प्रकाशेन तमो निःसार्य पुनरुत्पन्नानीव करोतीत्यर्थः ।। नेत्री । 'णीञ् प्रापणे' । तृच् । 'ऋन्नेभ्यो ङीप्' (पाणिनिः ४।१।५) 'उदात्तयणो हल्पूर्वात्' (पाणिनिः ६।१।१७४) इति ङीप उदात्तत्वम् । अचेति । 'चिती संज्ञाने' । दुरः । द्वारशब्दस्य 'रयेमंतौ

CC-0. Nepal Sanskrit Academy, Kathmandu

बहुलम्' (पाणिनिः ६।१।३७) इति बहुलवचनात् संप्रसारणम् । आवः । 'वृञ् वरणे' । लुङि 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः' (पाणिनिः २।४।८०) इति चलेर्लुक् । गुणः । 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' (पाणिनिः ६।१।६८) इति तिलोपः । 'छन्दस्यपि दृश्यते' (पाणिनिः ६।४।७३) इति आडागमः । प्रार्प्य । 'ऋ गतौ' । णौ 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ' (पाणिनिः ७।३।३६) इत्यनेन पुक् । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (पाणिनिः ७।१।३७) । अख्यत् । 'ख्या प्रकथने' । लुङि 'अस्यतिवक्तिख्यातिभ्योऽङ्' (पाणिनिः ३।१।५२) इत्यनेन च्लेरङादेशः । अजीगः । 'गॄ निगरणे' । लङि तिपि 'बहुलं छन्दसि' (पाणिनिः २।४।७६) इति विकरणस्य श्लुः । द्विर्वचनोरदत्वहलादिशेषाः । 'अर्तिपिपर्त्योश्च' (पाणिनिः ७।४।७७), 'बहुलं छन्दसि' (पाणिनिः ७।४।७८) इति अभ्यासस्य इत्वम् । छान्दसः ईकारः । यद्वा । अस्मात् ण्यन्तात् लुङि चङि द्विर्भावसन्वद्भावेत्वदीर्घाः । छान्दसः चङो लोपः ॥

जिह्मश्ये चरितवे मघोन्याभोगय इष्टये राय उ त्वम् ।
दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥५॥

जिह्मऽश्ये । चरितवे । मघोनी । आऽभोगये । इष्टये । राये । ॐ इति । त्वम् । दभ्रम् । पश्यत्ऽभ्यः । उर्विया । विऽचक्षे । उषाः । अजीगः । भुवनानि । विश्वा ॥५॥

मघोनी इत्युषसो नामधेयम् । मघोनी धनवती उषाः जिह्मश्ये जिह्मं वक्रं शयानाय पुरुषाय चरितवे चरितुं शयनादुत्थाय स्वापेक्षितं प्रति गन्तुं व्युच्छन्ती भवति । त्वम् । अयमेकशब्दपर्यायः सर्वनामशब्दः । यदाह– 'त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्' (निरुक्तम् १।७) इति । त्वम् एकं प्रति आभोगये आभोग्याय शब्दादिविषयार्थं तथा अपरं प्रति इष्टये यागार्थं तथा अन्यं प्रति राये धनार्थं च व्युच्छन्तीति शेषः । उशब्दश्चार्थे । अपि च दभ्रम् अल्पं पश्यद्भ्यः अन्धकारावृतत्वेन ईषद्द्रष्टृभ्यो मनुष्येभ्यः विचक्षे विशिष्टप्रकाशाय व्युच्छन्ती उर्विया उर्वी विस्तीर्णा उषाः सर्वाणि भूतजातानि तमसा तिरोहितानि प्रकाश-

CC-0. Nepal Sanskrit Academy, Kathmandu

दानेन उद्गीर्णानीव करोति ।। जिह्मश्ये । 'शीङ् स्वप्ने' । जिह्मं शेते इति जिह्मशीः । 'क्विप् च' (पाणिनिः ३।२।७६) इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । 'एरनेकाचोऽसंयोगपूर्वस्य' (पाणिनिः ६।४।८२) इति यण् । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (पाणिनिः ८।२।४) इति विभक्तेः स्वरितत्वम् । आभोगये । आभोगशब्दाच्चतुर्थ्येकवचने यकारोपजनः । यद्वा । आङ्पूर्वात् भुजेः बहुलवचनादौणादिकः किप्रत्ययः कुत्वं च । उर्विया । 'इयाडियाजीकाराणामुपसंख्यानम्' (पाणिनिः ७।१।३९) इति उर्वीशब्दादुत्तरस्य सोः डियाजादेशः । विचक्षे । 'चक्षिङ् व्यक्तायां वाचि' । विपूर्वादस्मात् संपदादिलक्षणो भावे क्विप् ।।

क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।
विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ।।६।।

क्षत्राय । त्वम् । श्रवसे । त्वम् । महीयै । इष्टये । त्वम् । अर्थम्ऽइव । त्वम् । इत्यै । विऽसदृशा । जीविता । अभिऽप्रचक्षे । उषाः । अजीगः । भुवनानि । विश्वा ।।६।।

क्षत्राय । धननामैतत् । धनार्थं त्वम् एकं प्रति उषा व्युच्छन्ती इति शेषः । तथा श्रवसे अन्नार्थं त्वम् एकं प्रति महीयै महत्यै इष्टये अग्निष्टोमादिमहायज्ञार्थं त्वम् एकं प्रति व्युच्छन्ती । तथा अर्थमिव अपेक्षितमर्थं प्रति इत्यै गमनार्थं त्वम् एकं प्रति व्युच्छन्ती । अपि च विसदृशा विलक्षणानि नानारूपाणि जीविता जीवितानि जीवनोपायभूतानि कृषिवाणिज्यादीनि अभिप्रचक्षे आभिमुख्येन प्रकाशयितुं व्युच्छन्ती उषाः सर्वाणि भूतजातानि तमसा निगीर्णानि अजीगः प्रकाशनेन उद्गीर्णानीवाकरोत् ।। त्वम् । 'त्वत्त्वसमसिमनेमेत्यनुच्चानि' (फिट्सूत्रम् ७८) इति सर्वानुदात्तत्वम् । महीयै । मह्यै । महेः 'इन् सर्वधातुभ्यः' (उणादिसूत्रम् ५५७) इति इन्प्रत्ययः । 'कृदिकारादक्तिनः' (पाणिनिः ४।१।३१) इति ङीष् । 'उदात्तयणो हल्पूर्वात्' (पाणिनिः ६।१।१७४) इति विभक्तेरुदात्तत्वम् । छान्दसः ईकारोपजनः । यद्वा । महीशब्दादुत्तरस्य चतुर्थ्येकवचनस्य 'याडापः' (पाणिनिः ७।३।११३) इति व्यत्ययेन

CC-0. Nepal Sanskrit Academy, Kathmandu
थाडागमः । छान्दसमन्तोदात्तत्वम् । विसदृशा । 'त्यदादिषु दृशोऽनालोचने कञ्च' (पाणिनिः ३।२।६०) इत्यत्र 'समानान्ययोश्च' इति वचात् दृशेः कञ् । 'समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु' (पाणिनिः ६।३।८४) इति सभावः । विगतसादृश्यानि विसदृशानि । 'शेश्छन्दसि बहुलम्' (पाणिनिः ६।१।७०) इति शेर्लोपः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अभिप्रचक्षे । चक्षेः 'तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः (पाणिनिः ३।४।६) इति सेन्प्रत्ययः । 'स्कोः संयोगाद्योरन्ते च' (पाणिनिः ८।२।२९) इति कलोपः । कत्वषत्वे ॥

(ऋग्वेद, १ अष्टक, ८ अध्याय, १ वर्ग)

CC-0. Nepal Sanskrit Academy, Kathmandu

लोपामुद्रा र अगस्त्यको संवाद

लोपामुद्रा आह–

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ।।१।।

पूर्वीः । अहम् । शरदः । शश्रमाणा । दोषाः । वस्तोः । उषसः । जरयन्तीः । मिनाति । श्रियम् । जरिम । तनूनाम् । अपि । ऊँ इति । नु । पत्नीः । वृषणः । जगम्युः ।।१।।

हे अगस्त्य अहं लोपामुद्रा पूर्वीः शरदः पुरातनानसंख्यातान् संवत्सरान् दोषाः रात्रीः वस्तोः अहानि तथा देहं जरयन्तीः उषसः उषःकालांश्च ।। सर्वत्र अत्यन्तकालसंयोगे द्वितीया ।। अद्यतनकालपर्यन्तं बहुसंवत्सरं कार्त्स्न्येन त्वच्छुश्रूषया शश्रमाणा श्रान्ताभूवम् । इदानीं तु जरिमा जरा तनूनाम् अङ्गानां श्रियं सौन्दर्यं मिनाति हिनस्ति । एवमपि नानुगृह्णासीत्यर्थः । अप्यू नु । अपिः संभावनायाम् । उ इत्यवधारणे । नु इति वितर्के । इदानीमपि किं संभावनीयम् । लोके हि पत्नीः स्त्रियः वृषणः सेक्तारः पुरुषाः जगम्युः गच्छेयुः संभोगं कुर्युः । अतो मां किमित्यवमन्यसे । इदानीमपि वा संभावयेत्यर्थः ।।

सा तमेवाह–

ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि ।
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ।।२।।

ये । चित् । हि । पूर्वे । ऋतऽसापः । आसन् । साकम् । देवेभिः । अवदन् । ऋतानि । ते । चित् । अव । असुः । नहि । अन्तम् । आपुः । सम् । ऊँ इति । नु । पत्नीः । वृषऽभिः । जगम्युः ।।२।।

हे पते अगस्त्य ये चिद्धि येऽपि तु पूर्वे पुनरातनाः ऋतसापः सत्यस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

आपयितारो व्याप्नुवाना महर्षयः आसन् ते देवेभिः देवैः साकं सह ऋतानि सत्यवाक्यानि अवदन् वदन्ति। ये महत्तपो यज्ञं वा अनुतिष्ठन्ति ये च देववाक्यानि देवस्मृतिरूपाणि वदन्ति ते चित्। चिदप्यर्थे। ते चित् अवासुः अवक्षिपन्ति रेतः ॥ स्यतिरुपसृष्टो विमोचने वर्तते ॥ ते नह्यन्तमापुः नहि ब्रह्मचर्यादेरन्तं प्राप्नुवन्। ब्रह्मचर्यमनिषिद्धर्तुकालगमनमपि कुर्वन्तीत्यर्थः। तथा पत्नीः पत्न्यश्च तपस्यमानाः वृषभिः भागवर्षकैः पतिभिः सह समू नु जगम्युः। उ नु इति पूरणौ। संगच्छेरन्। अतस्त्वं कथं मां नानुभवसीत्यर्थः ॥

अगस्त्यस्तामाह--

न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव।
जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव ॥३॥

न। मृषा। श्रान्तम्। यत्। अवन्ति। देवाः। विश्वाः। इत्। स्पृधः। अभि। अश्नवाव। जयाव। इत्। अत्र। शतऽनीथम्। आजिम्। यत्। सम्यञ्चा। मिथुनौ। अभि। अजाव ॥३॥

भोः पत्नि त्वया मया न मृषा श्रान्तम्। व्यर्थं नैव खिन्नमावाभ्याम्। यत् यस्मात् देवाः अवन्ति रक्षन्ति तपोभिः प्रीता देवाः। विश्वाः सर्वाः स्पृधः अभ्यश्नवाव अभितो व्याप्नुयाव अत्र। अस्मिन् संसारे शतनीथम् अपरिमितभोगप्राप्तिसाधनम् आजिं प्राप्तिं परस्परं जयाव जयलक्षणं सुरतसंग्रामं वा जयाव। यत् यस्मात् सम्यञ्चा सम्यक् परस्परं गच्छन्तौ प्रजयन्तौ वा मिथुना मिथुनौ स्त्रीपुरुषरूपौ सन्तौ अभ्यजाव त्वं चाहमपि परस्परमभिजयावेत्येवं तयोक्तं संभोगं संभावयामास ॥

अथ चतुर्थ्याप्यगस्त्य आह--

नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित्।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥

नदस्य। मा। रुधतः। कामः। आ। अगन्। इतः। आऽजातः।

CC-0. Nepal Sanskrit Academy, Kathmandu

अमुतः । कुतः । चित् । लोपामुद्रा । वृषणम् । निः । रिणाति । धीरम् । अधीरा । धयति । श्वसन्तम् ।।४।।

हे जाये नदस्य नदनस्य जपशब्दयितुर्जपाध्ययनकर्तुः रुधतः रेतोनिरोद्धुर्ब्रह्मचर्यमास्थितस्य ।। उभे कर्मणि षष्ठचौ ।। उक्तलक्षणं मां कामः आगन् आगमत् । 'नदनस्य मा रुधतः काम आगमत्' (निरुक्तम् ५। २) इति । कस्य हेतोरिति उच्यते । इतः त्वत्संगमनिमित्तात् तथा अमुतः वसन्तादिकालात् कुतश्चित् कारणात् आजातः सर्वतः उत्पन्नः । यद्वा । इत एतल्लोकजनितादमुतो लोकान्तरजनिताद्वा कुतश्चिन्निमित्तात् कामात् । कथमिति उच्यते । इयं लोपामुद्रा वृषणं रेतसः प्रवर्तकं मां नी रिणाति नितरां गच्छतु । किंच धीरं धीमन्तं नियमादविचालिनं श्वसन्तं महाप्राणं महाबलम् अधीरा कातरैषा योषित् धयति उपभुङ्क्ताम् ।।

अथानयोर्दम्पत्योः सभोगसंलापं श्रुत्वा तत्प्रायश्चित्तं चिकीर्षुरुत्तराभ्यामाह । अनयोर्विनियोगः शौनकेनोक्तः– इमं नु सोममित्येते द्वे ऋचौ प्रयतो जपन् । सर्वान् कामानवाप्नोति पापेभ्यश्च प्रमुच्यते' (ऋग्वि. १.१४७) इति ।।

इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ।
यत्सीमागश्चकृमा तत्सु मृडतु पुलुकामो हि मर्त्यः ।।५।।

इमम् । नु । सोमम् । अन्तितः । हृत्ऽसु । पीतम् । उप । ब्रुवे । यत् । सीम् । आगः । चकृम । तत् । सु । मृडतु । पुलुऽकामः । हि । मर्त्यः ।।५।।

---- उपेत्य मनसा प्राप्य प्रार्थयते । किं ब्रवीति उच्यते । यत् आगः गुर्वोः कामप्रलापश्रवणविषयं पापं चकृम कृतवन्तो वयं तत् तस्मादागसः स सोमः सु सम्यक् मृडतु सुखयतु पापजनितदुःखं मा करोत्वित्यर्थः । महत्पापमनुभुज्यमानं प्रार्थनया कथं लुप्यते इति अत आह । हि यस्मात् मर्त्यः मनुष्यः पुलुकामः बहुकामनावान् । अल्पेनैव कर्मणा बहुकामानाकलयति । यस्मादेवं तस्मात् परिहरेत्यर्थः । यद्वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अयमपवर्जनीयतया प्राप्यत इवेत्याह । पुरुकामो हि खलु मर्त्यः कामहतः सन् कामेन निरुद्ध एव वर्तते । अतस्तयोरुत्सेकोऽयुक्तः । तच्छब्दश्रवण-दोषोऽपि प्रामादिकः अस्माकं प्राप्तेन सोमेन परिहर्तव्य इत्यर्थः । यद्वा । अयं मन्त्रश्चन्द्रपरो व्याख्येयो मनसोऽभिमानित्वाच्च तस्य पापस्यापि मनस्येव संभावितत्वात् । अस्मिन् पक्षे हृत्सु पीतं हृदयस्थितमित्यर्थः । शिष्टं स्पष्टम् ।।

अथ विनियुक्तयोर्मध्ये द्वितीयया सूक्ते षष्ठ्या अन्तेवास्याह ।।

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ।।६।।

अगस्त्यः । खनमानः । खनित्रैः । प्रऽजाम् । अपत्यम् । बलम् । इच्छमानः । उभौ । वर्णौ । ऋषिः । उग्रः । पुपोष । सत्याः । देवेषु । आऽशिषः । जगाम ।।६।।

अयम् अगस्त्यः मद्गुरुः खनित्रैः फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः खनमानः फलमभिमतमुत्पादयन् प्रजां प्रकर्षेण पुनःपुनर्जायमानम् अपत्यं कुलस्यापतनसाधनं पुत्रादिकं बलं च इच्छमानः सन् । यद्वा । प्रजां भृत्यादिरूपां च इच्छन् । ऋषिः अतीन्द्रियद्रष्टा महानुभावः उग्रः उद्गूर्णः संसारे संचरन्नप्यपापः सन् उभौ वर्णौ वर्णनीयावाकारौ कामं च तपश्च पुपोष । सत्याः आशिषः देवेषु देवेभ्यः जगाम प्राप्तवान् । यतोऽयं महानुभावस्तस्मादस्मान् पातीत्यर्थः ।।

(ऋग्वेद, २ अष्टक, ४ अध्याय, २२ वर्ग)

CC-0. Nepal Sanskrit Academy, Kathmandu

उषा

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ।।१।।

उत् । ऊँ इति । श्रिये । उषसः । रोचमानाः । अस्थुः । अपाम् । न । ऊर्मयः । रुशन्तः । कृणोति । विश्वा । सुऽपथा । सुऽगानि । अभूत् । ऊँ इति । वस्वी । दक्षिणा । मघोनी ।।१।।

रोचमानाः दीप्यमानाः रुशन्तः शुक्लवर्णाः । 'रुशदिति वर्णनाम' (निरुक्तम् २।२०) इति यास्कः । उषसः श्रिये जगतः शोभार्यं जगद् व्याप्तुं वा अपाम् ऊर्मयः न उदकसंबन्धिनस्तरङ्गा इव उत् अस्थुः उत्तिष्ठन्ति । अनन्तरमेकवन्निगमः । उषाः विश्वा विश्वानि स्थानानि सुपथा सुमार्गाणि सुगानि सुखेन गम्यानि कृणोति करोति । अपि च मघोनी धनवत्युषाः वस्वी प्रशस्ता दक्षिणा समर्धयित्री च अभूत् ।।

भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ।।२।।

भद्रा । ददृक्षे । उर्विया । वि । भासि । उत् । ते । शोचिः । भानवः । द्याम् । अपप्तन् । आविः । वक्षः । कृणुषे । शुम्भमाना । उषः । देवि । रोचमाना । महःऽभिः ।।२।।

हे उषो देवि भद्रा कल्याणी ददृक्षे दृश्यसे । उर्विया विस्तीर्णा च वि भासि । ते तव शोचिः शोचिषः ।। जसो लुक् ।। दीप्यमानाः भानवः रश्मयः द्याम् अन्तरिक्षम् उत् अपप्तन् उत्पतन्ति । किंच हे उषो देवि वक्षः महोभिः तेजोभिः शुम्भमाना शोभमाना रोचमाना दीप्यमाना त्वदीयं रूपम् आविः कृणुषे प्रकटीकरोषि ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् ।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोडहा ॥३॥

वहन्ति । सीम् । अरुणासः । रुशन्तः । गावः । सुऽभगाम् । उर्विया । प्रथानाम् । अप । ईजते । शूरः । अस्ताऽइव । शत्रून् । बाधते । तमः । अजिरः । न । वोडहा ॥३॥

अरुणासः लोहितवर्णाः रुशन्तः दीप्यमानाः गावः रश्मयः । 'किरणा गावः' इति रश्मिनामसु पाठात् । सुभगाम् उर्विया उर्वी विस्तीर्णां प्रथानां प्रथमानां सीम् एनामुषोदेवतां वहन्ति । सेयमुषोदेवता शूरो अस्तेव वीरः क्षेप्तेव शत्रून् तमः अपेजते अपगमयति । वोडहा सेनायाः अजिरो न क्षिप्रगामी शत्रून् यथा बाधते तथा तमांसि बाधते च ॥

उत्ते वयश्चिद् वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥६॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ । अमा । सते । वहसि । भूरि । वामम् । उषः । देवि । दाशुषे । मर्त्याय ॥६॥

हे उषो देवि ते तव व्युष्टौ सत्यां वयश्चित् पक्षिणोऽपि वसतेः निवासस्थानात् उत् अपप्तन् उत्पतन्ति । ये पितुभाजः हविषां संभक्तारः अन्नस्योपार्जका वा । 'पितुः' इत्यन्ननामसु पाठात् । नरः तेऽपि च उत्पतन्ति । किंच हे उषो देवि त्वम् अमा समीपे सते वर्तमानाय दाशुषे हविषां प्रदात्रे मर्त्याय भूरि प्रभूतं वामं धनं वहसि ।

(ऋग्वेद ५ अष्टक, १ अध्याय, ५ वर्ग)

CC-0. Nepal Sanskrit Academy, Kathmandu

वीरगाथा

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ।।२।।

धन्वना । गाः । धन्वना । आजिम् । जयेम । धन्वना । तीव्राः । सऽमदः । जयेम । धनुः । शत्रोः । अपऽकामम् । कृणोति । धन्वना । सर्वाः । प्रऽदिशः । जयेम ।।२।।

धन्वना चापेन गाः शत्रूणां जयेम वयं वशीकरवाम । धन्वना आजिं संग्रामं च जयेम । धन्वना तीव्राः उद्धताः समदः अत्यन्तं मदवतीः शत्रुसेनाश्च जयेम । तथा च यास्कः– 'समदः समदो वात्तेः संमदो वा मदतेः' (निरुक्तम् ९। १७) इति । धनुः शत्रोः अपकामं कामस्यापायं कृणोति करोतु । किंच धन्वना वयं सर्वाः प्रदिशः सर्वासु दिक्षु वर्तमानान् शत्रून् जयेम । प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते मञ्चाः क्रोशन्तीतिवत् । धन्वञ्शब्दस्य जयतेश्चावृत्तिरादरार्था ।।

(ऋग्वेद ५ अष्टक, १ अध्याय, १९ वर्ग; शुक्लयजुर्वेद २९।३९)

CC-0. Nepal Sanskrit Academy, Kathmandu

त्यो चिनिँदैन

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥७॥

न । तम् । विदाथ । यः । इमा । जजान । अन्यत् । युष्माकम् । अन्तरम् । बभूव । नीहारेण । प्रावृताः । जल्प्या । च । असुऽतृपः । उक्थऽशासः । चरन्ति ।

हे नराः तं विश्वकर्माणं न विदाथ न जानीथ य इमा इमानि भूतानि जजान उत्पादितवान् । देवदत्तोऽहं यज्ञदत्तोऽहमिति वयमात्मानं विश्वकर्माणं जानीम इति यदुच्यते तदसत् । न ह्यहंप्रत्ययगम्यं जीवरूपं विश्वकर्मणः परमेश्वरस्य तत्त्वं किंतु युष्माकम् अहंप्रत्ययगम्यानां जीवानाम् अन्तरं अन्यत् अहंप्रत्ययगम्यादतिरिक्तं सर्ववेदान्तवेद्यमीश्वरतत्त्वं बभूव भवति विद्यते । जीवरूपवत् तदपि कुतो न विद्म इति चेत् श्रूयताम् । नीहारेण प्रावृताः यूयं नीहारसदृशेनाज्ञानेनाच्छन्नाः । अतो न जानीथ । यथा नीहारो नात्यन्तमसन् दृष्टेरावरकत्वात् नाप्यत्यन्तं सन् काष्ठपाषाणादिरूपान्तरेण सम्बन्धुमयोग्यत्वात् एवमज्ञानमपि नात्यन्तमसदीश्वरतत्त्वावरकत्वात् नापि सत् बोधमात्रनिवर्त्यत्वात् । ईदृशेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः । न केवलं प्रावृतत्वं किंतु जल्प्या च देवोऽहं मनुष्योऽहमित्याद्यनृतजल्पनेन प्रावृताः । किंच असुतृपः केनाप्युपायेन असून् प्राणांस्तृप्यन्तः उदरंभरा इत्यर्थः । न तु पारमेश्वरं तत्त्वं विचारितवन्तः । न केवलमिहलोकभोगमात्रतृप्ताः उक्थशासः नानाविधेषु यज्ञेषु उक्थं प्रउगनिष्केवल्यादिकं शंसन्तः चरन्ति पृथिव्यां वर्तन्ते । केवलमैहिकामुष्मिकभोगपरा वर्तध्वेऽतो विश्वकर्माणं देवं न जानीथेत्यर्थः ॥

(ऋग्वेद ८ अष्टक, ३ अध्याय, १७ वर्ग; शुक्लयजुर्वेद १७।३१)

CC-0. Nepal Sanskrit Academy, Kathmandu

उर्वशी र पुरूरवाको संवाद

अत्र वाजसनेयकम्-- उर्वशी हाप्सराः पुरूरवसमैडं चकमे तँ ह विन्दमानोवाच त्रिः स्म माह्नो वैतसेन दण्डेन हतादकामाँ स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति । सा हास्मिञ्ज्योगुवासापि हास्माद् गर्भिण्यास तावज्ज्योग्घास्मिन्नुवास ततो ह गन्धर्वाः समूदिरे ज्योग्वा इयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै हाविद्वर्युरणा शयन उपबद्धास ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः । सा होवाचावीर इव बत मेऽजन इव पुत्रं हरन्तीति द्वितीयं प्रमेथुः सा ह तथैवोवाच । अथ हायमीक्षांचक्रे कथं नु तदवीरं कथमजनँ स्याद्यत्राहँ स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने यद्वासः पर्यधास्यत ततो ह गन्धर्वा विद्युतं जनयांचक्रुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव पुनरैमीत्येत्तिरोभूतां स आध्या जल्पन्कुरुक्षेत्रं समया चचारान्यतःप्लक्षेति बिसवती तस्यै हाध्यन्तेन वव्राज तद्ध ता अप्सरस आतयो भूत्वा परिपुप्लुविरे । तँ हेयं ज्ञात्वोवाच अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वा आविरसामेति तथेति तस्मै हाविरासुः । ताँ हायं ज्ञात्वाभिपरोवाद 'हये जाये मनसा' (शतपथब्राह्मणम् ११।५।१) इत्यादि ॥

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥१॥

हये । जाये । मनसा । तिष्ठ । घोरे । वचांसि । मिश्रा । कृणवावहै । नु । न । नौ । मन्त्राः । अनुदितासः । एते । मयः । करन् । परऽतरे । चन । अहन् ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

त्यो चिनिँदैन

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ।।७।।

न । तम् । विदाथ । यः । इमा । जजान । अन्यत् । युष्माकम् । अन्तरम् । बभूव । नीहारेण । प्रावृताः । जल्प्या । च । असुऽतृपः । उक्थऽशासः । चरन्ति ।

हे नराः तं विश्वकर्माणं न विदाथ न जानीथ य इमा इमानि भूतानि जजान उत्पादितवान् । देवदत्तोऽहं यज्ञदत्तोऽहमिति वयमात्मानं विश्वकर्माणं जानीम इति यदुच्यते तदसत् । न ह्यहंप्रत्ययगम्यं जीवरूपं विश्वकर्मणः परमेश्वरस्य तत्त्वं किंतु युष्माकम् अहंप्रत्ययगम्यानां जीवानाम् अन्तरं अन्यत् अहंप्रत्ययगम्यादतिरिक्तं सर्ववेदान्तवेद्यमीश्वरतत्त्वं बभूव भवति विद्यते । जीवरूपवत् तदपि कुतो न विद्म इति चेत् श्रूयताम् । नीहारेण प्रावृताः यूयं नीहारसदृशेनाज्ञानेनाच्छन्ना । अतो न जानीथ । यथा नीहारो नात्यन्तमसन् दृष्टेरावरकत्वात् नाप्यत्यन्तं सन् काष्ठपाषाणादिरूपान्तरेण सम्बन्धुमयोग्यत्वात् एवमज्ञानमपि नात्यन्तमसदीश्वरतत्त्वावरकत्वात् नापि सत् बोधमात्रनिवर्त्यत्वात् । ईदृशेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः । न केवलं प्रावृतत्वं किंतु जल्प्या च देवोऽहं मनुष्योऽहमित्याद्यनृतजल्पनेन प्रावृताः । किंच असुतृपः केनाप्युपायेन असून् प्राणांस्तृप्यन्तः उदरंभरा इत्यर्थः । न तु पारमेश्वरं तत्त्वं विचारितवन्तः । न केवलमिहलोकभोगमात्रतृप्ताः उक्थशासः नानाविधेषु यज्ञेषु उक्थं प्रउगनिष्केवल्यादिकं शंसन्तः चरन्ति पृथिव्यां वर्तन्ते । केवलमैहिकामुष्मिकभोगपरा वर्तध्वेऽतो विश्वकर्माणं देवं न जानीथेत्यर्थः ।।

(ऋग्वेद ८ अष्टक, ३ अध्याय, १७ वर्ग; शुक्लयजुर्वेद १७।३१)

CC-0. Nepal Sanskrit Academy, Kathmandu

उर्वशी र पुरूरवाको संवाद

अत्र वाजसनेयकम्-- उर्वशी हाप्सराः पुरूरवसमैडं चकमे तँ ह विन्दमानोवाच त्रिः स्म माह्नो वैतसेन दण्डेन हतादकामाँ स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति । सा हास्मिञ्ज्योगुवासापि हास्माद् गर्भिण्यास तावज्ज्योग्घास्मिन्नुवास ततो ह गन्धर्वाः समूदिरे ज्योग्वा इयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै हाविद्वर्युरणा शयन उपबद्धास ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः । सा होवाचावीर इव बत मेऽजन इव पुत्रँ हरन्ती- ति द्वितीयं प्रमेथुः सा ह तथैवोवाच । अथ हायमीक्षांचक्रे कथं नु तदवीरं कथमजनँ स्याद्यत्राहँ स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने यद्वासः पर्यधास्यत ततो ह गन्धर्वा विद्युतं जनयांचक्रुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव पुनरैमीत्येत्तिरोभूताँ स आध्या जल्पन्कुरुक्षेत्रँ समया चचारान्यतःप्लक्षेति बिसवती तस्यै हाध्यन्तेन वव्राज तद्ध ता अप्सरस आतयो भूत्वा परिपुप्लुविरे । तँ हेयं ज्ञात्वो- वाच अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वा आवि- रसामेति तथेति तस्मै हाविरासुः । ताँ हायं ज्ञात्वाभिपरोवाद 'हये जाये मनसा' (शतपथब्राह्मणम् ११।५।१) इत्यादि ॥

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥१॥

हये । जाये । मनसा । तिष्ठ । घोरे । वचांसि । मिश्रा । कृण- वावहै । नु । न । नौ । मन्त्राः । अनुदितासः । एते । मयः । करन् । परऽतरे । चन । अहन् ॥१॥

पुरूरवसो वाक्यम् । जायां पश्यन् वदति । हये हे घोरे । अस्माकं दुःखजनकत्वात् घोरकारिणि जाये मनसा अस्मदुपर्यनुरागवता मनसा युक्ता सती तिष्ठ क्षणमात्रं संनिधावेव निवस । हये इत्यस्य निघाताभावश्छान्दसः । किमर्थं संस्थानमिति तत्राह । वचांसि वाक्यानि मिश्राणि उक्तिप्रत्युक्तिरूपाणि नु अद्य क्षिप्रं वा कृणवावहै करवावहै । 'कृवि हिंसाकरणयोः' । 'धिन्विकृण्व्योर च' (पाणिनिः ३।१।८०) इत्युप्रत्ययः । किमर्थं वचसः करणमिति चेदुच्यते । नौ आवयोः मन्त्राः रहस्यार्थाः एते विवक्षिताः अनुदितासः अव्याह्रियमाणाः परस्परमसंभाष्यमाणा गुम्फिताः सन्तः परतरे चनाहन् । चनेति निपातसमुदायश्चार्थे । अनेकेषु दिवसेषु चरमेऽप्यहनि मयः । सुखनामैतत् । सुखं न करन् कुर्वन्ति । अतः कृणवावहा इति ।।

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वातइवाहमस्मि ।।२।।

किम् । एता । वाचा । कृणव । तव । अहम् । प्र । अक्रमिषम् । उषसाम् । अग्रियाऽइव । पुरूरवः । पुनः । अस्तम् । परा । इहि । दुःऽआपना । वातःऽइव । अहम् । अस्मि ।।२।।

अनया तमुर्वशी प्रत्युवाच । एता एतया वाचा केवलया पुनःसंभोगरहितया किं कृणव किं करवाव । अहं त्विदानीं त्वत्सकाशात् प्राक्रमिषम् अतिक्रान्तवत्यस्मि । अतिक्रमे दृष्टान्तः । उषसामग्रियेव बह्वीनामुषसां मध्येऽग्र्याग्रे भवा पूर्वोषाः प्राक्रमीद्यथा तथाहमपीति । यस्मादेवं तस्माद्धे पुरूरवः त्वं पुनः अस्मत्सकाशात् अस्तं गृहं परेहि परागच्छ । मा मय्यभिलाषं कार्षीः । स्वस्या दुर्ग्रहत्वमाह । अहं वातइव वायुरिव दुरापना दुष्प्रापा दुरापा वा अस्मि । 'दुरापा वा अहं त्वयैतर्ह्यस्मि पुनर्गृहानिहीति हैवैनं तदुवाच' (शतपथब्राह्मणम् ११।५।१।७) इति वाजसनेयकम् ।।

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ।।३।।

CC-0. Nepal Sanskrit Academy, Kathmandu

इषुः । न । श्रिये । इषुऽधेः । असना । गोऽसाः । शतऽसाः । न । रंहिः । अवीरे । क्रतौ । वि । दविद्युतत् । न । उरा । न । मायुम् । चितयन्त । धुनयः ।।३।।

अनया पुरूरवाः स्वस्य विरहजनितं वैक्लव्यं तां प्रति ब्रूते । इषुधेः । इषवो धीयन्तेऽत्रेतीषुधिर्निषङ्गः । ततः सकाशात् इषुः असना असनायै प्रक्षेप्तुं न भवति श्रिये विजयार्थम् । त्वद्विरहाद्युद्धस्य बुद्धावप्य-निधानात् । तथा रंहिः वेगवानहं शत्रुसकाशात् गोषाः तेषां शत्रूणां गवां संभक्ता न अभवम् । तथा शतसाः शतानामपरिमितानां शत्रुधनानां संभक्ता नाभवम् । किंच अवीरे वीरवर्जिते क्रतौ राजकर्मणि सति न वि दविद्युतत् न विद्योतते मत्सामर्थ्यम् । किंच धुनयः कम्पयितारोऽस्मदीया भटाः उरा उरौ । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्याजालः' (पाणिनिः ७।१।३९) इति सप्तम्या डादेशः । विस्तीर्णे संग्रामे मायुम् । मीयते प्रक्षिप्यत इति मायुः शब्दः । 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उणादिसूत्रम् १) इत्यनेनोण् । सिंहनादं न चितयन्त न बुध्यन्ते । 'चिती संज्ञाने' । अस्माण्णिचि संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः । छान्दसो लङ ।।

सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात् ।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन ।।४।।

सा । वसु । दधती । श्वशुराय । वयः । उष । यदि । वष्टि । अन्तिऽगृहात् । अस्तम् । ननक्षे । यस्मिन् । चाकन् । दिवा । नक्तम् । श्नथिता । वैतसेन ।।४।।

इदमुत्तरं चोर्वशीवाक्यम् । आद्येन पुरात्मना कृतमुषसे निवेदयति । हे उषः सा इयमुर्वशी वसु वासकं वयः अन्नं श्वशुराय भर्तुः पुरूरवसः पित्रे दधती प्रयच्छन्ती तत्र गृहे स्थिता यदि पतिं वष्टि कामयते तदा अन्तिगृहात् । स्वभर्तृभोगगृहान्तिके यत् श्वशुरस्य भोजनगृहं तदन्ति-गृहम् । तस्माद् गृहात्सोर्वशी अस्तं पतिगृहं ननक्षे व्याप्नोति । यस्मिन् गृहे चाकन् कामयत उर्वशी । सा चोर्वशी, दिवा नक्तम् अहनि रात्रौ च वैत-

CC-0. Nepal Sanskrit Academy, Kathmandu
सेन । 'शेपो वैतस इति पुंस्प्रजननस्य' (निरुक्तम् ३।२१) इति निरुक्तम् । पुंस्प्रजननेन श्नथिता ताडिता च भवति । एवमुर्वश्यात्मानं परोक्षेण विर्दिदेश ॥

त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि ।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः ॥५॥

त्रिः । स्म । मा । अह्नः । श्नथयः । वैतसेन । उत । स्म । मे । अव्यत्यै । पृणासि । पुरूरवः । अनु । ते । केतम् । आयम् । राजा । मे । वीर । तन्वः । तत् । आसीः ॥५॥

अनेन पुरूरवसमेव संबोध्योक्तवती । हे पुरूरवः त्वं मा माम् अह्नः अहनि वैतसेन दण्डेन पुंव्यञ्जनेन त्रिः त्रिवारम् । 'द्वित्रिचतुर्भ्यः सुच्' (पाणिनिः ५।४।१८) श्नथयः स्म । अश्नथयः अताडयः । 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' (पाणिनिः २।३।६४) इति कालवाचिनोऽह्ःशब्दादधिकरणे षष्ठी । उत अपि च । स्म इति पूरणः । अव्यत्यै । सपत्नीभिः सह पर्यायेण पतिमागच्छति सा व्यती । न तादृश्यव्यती । तस्यै मे मह्यं पृणासि पूरयसि । एवं बुद्धया हे पुरूरवः ते तव केतं गृहम् अनु आयम् अन्वगमं पूर्वम् । हे वीर राजा त्वं च मे मम तन्वः शरीरस्य तत् तदा आसीः अभवः । सुखयितेति शेषः । परमप्येवं मन्तव्यं किमिति कातरो भवसीत्युवाच ॥१॥

या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रन्थिनी चरण्युः ।
ता अञ्जयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त ॥६॥

या । सुऽजूर्णिः । श्रेणिः । सुम्नेऽआपिः । ह्रदेऽचक्षुः । न । ग्रन्थिनी । चरण्युः । ताः । अञ्जयः । अरुणयः । न । सस्रुः । श्रिये । गावः । न । धेनवः । अनवन्त ॥६॥

पुरूरवसो वाक्यम् । या सुजूर्णिः सुजवा एतन्नामिकास्ति तथा या श्रेणिः या सुम्नआपिः या ह्रदेचक्षुः । नकारः समुच्चये । ताभिश्चतसृभिरालिभूताभिर्मानिनीभिः सहिता ग्रन्थिनी ग्रन्थनवती संदर्भवती चरण्युः चरणशीलोर्वश्याजगाम । यद्वा । ग्रन्थिनीत्येतत्सखिभूताप्सरो नामधेयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

या सुजूर्णिः सुजवोर्वशी सा ताभिः सह जगाम । ताः अप्सरसः अञ्जयः आभरणोपेताः अरुणयः अरुणवर्णाः न सस्रुः पूर्ववन्न गच्छन्ति । श्रिये श्रयणाय धेनवः नवप्रसूताः गावो न गाव इव । आश्रयार्थं यथा गावः अनवन्त शब्दायन्ते तथा न शब्दयन्तीति व्यतिरेके दृष्टान्तः ॥

समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्यः स्वगूर्ताः ।
महे यत्त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः ॥७॥

सम् । अस्मिन् । जायमाने । आसत । ग्नाः । उत । ईम् । अवर्धन् । नद्यः । स्वऽगूर्ताः । महे । यत् । त्वा । पुरूरवः । रणाय । अवर्धयन् । दस्युऽहत्याय । देवाः ॥७॥

अनयैताभिः सह संसर्गस्त्वयानुभूत इत्युर्वशी वदति । अस्मिन् पुरूरवसि जायमाने सति ग्नाः अप्सरसो देववेश्या अपि सम् आसत संगता अभवन् । अथवा जायमाने यज्ञार्थं प्रवर्धमाने सति ग्ना देवपत्न्यो-ऽपि समासत समभवन् । उत अपि च ईम् एनं पुरूरवसं स्वगूर्ताः स्वयं-गामिन्यः नद्यः तासामाश्रयभूता अवर्धयन् । किंच हे पुरूरवः यत् यस्मात् त्वा त्वां महे महते रणाय रमणीयाय संग्रामाय दस्युहत्याय दस्युहननाय देवाः त्वाम् अवर्धयन् ॥

सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।
अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः ॥८॥

सचा । यत् । आसु । जहतीषु । अत्कम् । अमानुषीषु । मानुषः । निऽसेवे । अप । स्म । मत् । तरसन्ती । न । भुज्युः । ताः । अत्रसन् । रथऽस्पृशः । न । अश्वाः ॥८॥

इदमादित्रीण्यैडवाक्यानि । तत्रादितो द्वाभ्यामुर्वशीमन्याश्च सह स्तौति । यत् यदा सचा सहायभूतः पुरूरवाः अत्कं स्वकीयं रूपम् । अत्क इति रूपनाम । जहतीषु परित्यजन्तीषु अमानुषीषु देवताभूतास्व-प्सरःसु मानुषः सन् निषेवे अभिमुखं गच्छति तदनीं ताः अप्सरसः मत् मत्तः अप अपसृत्य अत्रसन् । त्रसतिर्गतिकर्मा । गच्छन्ति । पलायने दृष्टान्तः । तरसन्ती भुज्युः न । तरसन्नाम मृगः । तस्य स्त्री भुज्युर्भोग-

CC-0. Nepal Sanskrit Academy, Kathmandu

साधनभूता स्त्री मृगी । सा यथा व्याधाद् भीता पलायते । किंच रथस्पृशो नाश्वाः रथे नियुक्ता अश्वाः इव । यथा ते पलायन्ते तद्वत्पलायन्त इति । उर्वश्यानेकाभिरस्माभिः सह भोगमनुभुक्तवानसीत्युक्तः प्रत्याचष्टे ॥

यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते ।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीडयो दन्दशानाः ॥

यद् । आसु । मर्तः । अमृतासु । निऽस्पृक् । सम् । क्षोणीभिः । क्रतुऽभिः । न । पृङ्क्ते । ताः । आतयः । न । तन्वः । शुम्भत । स्वाः । अश्वासः । न । क्रीडयः । दन्दशानाः ॥९॥

यत् यदा आसु अमृतासु अप्सरःसु मर्तः मनुष्यः पुरूरवाः निस्पृक् निःशेषेण स्पृशन् क्षोणीभिः वाग्भिः क्रतुभिर्न कर्मभिश्च सं पृङ्क्ते संपर्कं करोति । नकारः समुच्चयार्थः । ताः अप्सरसः आतयः आतिभूतास्तदानीं स्वाः तन्वः आत्मीयानि रूपाणि न शुम्भत न प्रकाशयन्ति । अश्वासो न अश्वा इव क्रीडयः संक्रीडमानाः दन्दशानाः दन्दशूका जिह्वाभिरात्मीयाः सृक्का भक्षयन्तः । ते यथा चापल्येन धावन्तः स्वरूपं न प्रयच्छन्ति रथिकाय तद्वदिति दुःखाद् ब्रूते ॥

विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि ।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥१०॥

विऽद्युत् । न । या । पतन्ती । दविद्योत् । भरन्ती । मे । अप्या । काम्यानि । जनिष्टो इति । अपः । नर्यः । सुऽजातः । प्र । उर्वशी । तिरत । दीर्घम् । आयुः ॥१०॥

अनयोर्वशीं स्तौति । या उर्वशी विद्युन्न विद्युदिव पतन्ती गच्छन्ती दविद्योत् द्योतते । किं कुर्वती । अप्या । अप इत्यन्तरिक्षनाम । तत्संबन्धीनि व्याप्तानि वा काम्यानि अस्मदभिमतान्युदकानि वा मे मह्यं भरन्ती संपादयन्ती । यदा आगतायास्तस्याः सकाशात् अपः व्याप्तः कर्मसु कर्मवान् वा नर्यः नरेभ्यो हितः सुजातः सुजननः पुत्रः जनिष्टो अजनिष्ट उत्पद्यते तदानीं मम उर्वशी दीर्घमायुः प्र तिरत

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रवर्धयति । 'प्रजामनु प्र जायसे तदु ते मर्त्यामृतम्' (तैत्तिरीयब्राह्मणम् १।५।६) इति हि मन्त्रः ॥ ॥२॥

जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः ।
अशासं त्वा विदुषी सस्मिन्नहन्न म आश्रृणोः किमभुग्वदासि ॥

जज्ञिषे । इत्था । गोऽपीथ्याय । हि । दधाथ । तत् । पुरूरवः । मे । ओजः । अशासम् । त्वा । विदुषी । सस्मिन् । अहन् । न । मे । आ । अश्रृणोः । किम् । अभुक् । वदासि ।११।।

इत्था इत्थं गोपीथ्याय । गौः पृथिवी । पीथं पालनम् । स्वार्थिकस्तद्धितः । भूमे रक्षणाय जज्ञिषे हि जातोऽसि खलु पुत्ररूपेण । 'आत्मा वै पुत्रनामा' इति श्रुतेः । पुनस्तदेवाह । हे पुरूरवः मे ममोदरे मयि ओजः अपत्योत्पादनसामर्थ्यं दधाथ मयि निहितवानसि । तत् तथास्तु । अथापि स्थातव्यमिति चेत् तत्राह । अहं विदुषी भावि कार्यं जानती सस्मिन्नहन् सर्वस्मिन्नहनि त्वया कर्तव्यं त्वा त्वाम् अशासं शिक्षितवत्यस्मि । त्वं मे मम वचनं न आश्रृणोः न श्रृणोषि । किं त्वम् अभुक् अभोक्तापालयिता प्रतिज्ञातार्थमपालयन् वदासि हये जाय इत्यादिकरूपं प्रलापम् । वदेर्लेटचाडागमः । दिवसे त्रिवारं यभस्व एडकद्वयमस्माकं पुत्रत्वेन परिकल्पय अपत्योत्पादनपर्यन्तं वसामि नग्नं त्वां यदाद्राक्षं तदा गच्छामीत्येवंरूपो मिथःसमयः 'उर्वशी हाप्सराः पुरूरवसमैडं चकमे तँ ह विन्दमानोवाच त्रिः स्म माह्नो वैतसेन दण्डेन' (शतपथब्राह्मणम् ११।५।१) इत्यादि वाजसनेयकमुदाहृतम् ॥

कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् ।
को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥

कदा । सूनुः । पितरम् । जातः । इच्छात् । चक्रन् । न । अश्रु । वर्तयत् । विऽजानन् । कः । दंपती इति दम्ऽपती । सऽमनसा । वि । यूयोत् । अध । यत् । अग्निः । श्वशुरेषु । दीदयत् ।।१२।।

इदं पुरूरवसो वाक्यम् । कदा कस्मिन् काले सूनुः तवोदरजातः

CC-0. Nepal Sanskrit Academy, Kathmandu

सन् पितरं माम् इच्छात् इच्छेत् । 'इषु इच्छायाम्' । लेटि शपि 'इषुगमियमां छः' (पाणिनिः ७।३।७७) इति छादेशः । 'लेटोऽडाटौ' (पाणिनिः ३।४।९४) इत्यडागमः । कदा वा विजानन् पितरं मामधिगच्छन् चक्रन् क्रन्दमानः नाश्रु वर्तयत् । नेति चार्थे । किंच कः किंविधः सन् सूनुः समनसा समनसौ समनस्कौ दंपती जायापती त्वां मां च वि यूयोत् विश्लेषयेत् । 'यु मिश्रणामिश्रणयोः' । यौतेश्छान्दसः शपः श्लुः । तुजादित्वादभ्यासस्य दीर्घः । अध अधुना यत् यदा अग्निः तव हृदयस्थितस्तेजोरूपो गर्भः श्वशुरेषु दीदयत् दीप्यते । दीदयतिर्दीप्तिकर्मेति नैरुक्तो धातुः ॥

प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै ।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥१३॥

प्रति । ब्रवाणि । वर्तयते । अश्रु । चक्रन् । न । क्रन्दत् । आऽध्ये । शिवायै । प्र । तत् । ते । हिनव । यत् । ते । अस्मे इति । परा । इहि । अस्तम् । नहि । मूर । मा । आपः ॥१३॥

इदमुर्वशीवाक्यम् । हे पुरूरवः त्वां प्रति ब्रवाणि प्रतिवच्मि । त्वदपत्यम् अश्रु बाष्पं वर्तयते वर्तयिष्यति । आध्ये आध्याते वस्तुनि शिवायै शिवे कल्याणे समुपस्थिते सति चक्रन् रुदन्नश्रूणि विमुञ्चन् न क्रन्दत् । नकारश्चार्थे । रोत्स्यति चेत्यर्थः । तत् त्वदपत्यं ते तुभ्यं हिनव प्रहिणोमि यत् अपत्यं ते तव संबन्धि अस्मे अस्मासु निहितम् । त्वं परेह्यस्तम् । अस्तमिति गृहनाम् । स्वगृहं प्रतिगच्छ । हे मूर मूढ मा मां नहि आपः न प्राप्नोषि । हिनवेत्यत्र हिनोतेः 'छन्दसि लुङ्लङ्लिटः' (पाणिनिः ३।४।६) इति भविष्यदर्थे लङि मिपोऽमादेशः । गुणः । अन्त्यलोपश्छान्दसः । बहुलवचनादडभावः । आपः । 'आप्लृ व्याप्तौ' । लिटि 'तिङां तिङो भवन्ति' इति थलो णल् ॥

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥

सुऽदेवः । अद्य । प्रऽपतेत् । अनावृत् । पराऽवतम् । परमाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गन्तवै । ॐ इति । अध । शयीत । निःऽऋतेः । उपऽस्थे । अध । एनम् । वृकाः । रभसासः । अद्युः ।। १४ ।।

अथ परिद्यूनः पुरूरवा उवाच । सुदेवः त्वया सह सुक्रीडः पतिः अद्य प्रपतेत् । अत्रैव प्रपततु । अथवा अनावृत् अनावृत्तः सन् परमां परावतं दूरादपि दूरदेशं गन्तवै गन्तुं महाप्रस्थानगमनं कुर्यात् । अध अथवा यत्रकुत्रापि गन्तुमसमर्थः निर्ऋतेः पृथिव्याः उपस्थे शयीत शयनं कुर्यात् । यद्वा । निर्ऋतिः पापदेवता । तस्या उपस्थे उत्संगे संनिधौ म्रियतामित्यर्थः । अध अथवा एनं वृकाः आरण्याः श्वानः रभसासः वेगवन्तः अद्युः भक्षयन्तु । अत्र वाजसनेयकं-- 'सुदेवोऽद्योद्वा बध्नीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैव तदुवाच' (शतपथब्राह्मणम् ११।५।१।८) इति ।।

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ।।१५।।

पुरूरवः । मा । मृथाः । मा । प्र । पप्तः । मा । त्वा । वृकासः । अशिवासः । ॐ इति । क्षन् । न । वै । स्त्रैणानि । सख्यानि । सन्ति । सालावृकाणाम् । हृदयानि । एता ।।१५।।

तमितरा प्रत्युवाच । हे पुरूरवः त्वं मा मृथाः मृतिं मा प्राप्नुहि । म्रियतेर्लुङि थासि 'ह्रस्वादङ्गात्' (पाणिनिः ८।२।२७) इति सिचो लोपः । तथा मा प्र पप्तः अत्रैव पतनं मा कार्षीः । पतेर्लुङि ऌदित्वात् 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (पाणिनिः ३।१।५५) इति च्लेरङ् । 'पतः पुम्' (पाणिनिः ७।४।१९) इति पुम् । तथा त्वा त्वाम् अशिवासः अशुभाः वृकासः वृकाः मा उ क्षन् । उ इत्येवकारार्थे । अक्षन् माऽभ्यवहारयन्तु । किमित्येवमस्मदुपर्याग्रहं करोषि । मा कार्षीरित्यर्थः । अदेर्लुङि 'लुङसनोर्घसॢ' (पाणिनिः २।४।३७) इति घसॢादेशः । 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः' (पाणिनिः २।४।८०) इति च्लेर्लुक् । 'गमहनजनखनघसां लोपः क्ङित्यनङि' (पाणिनिः ६।४।९८) इति उपधालोपः । 'शासिवसिघसीनां च' (पाणिनिः ८।३।६०) इति

CC-0. Nepal Sanskrit Academy, Kathmandu
षत्वम् । 'खरि च' (पाणिनिः ८।४।५५) इति चर्त्वम् । बाहुलका-दडभावः । अथ स्वस्नेहस्यासारतामाह । स्त्रैणानि स्त्रीणां कृतानि सख्यानि न वै सन्ति । न सन्ति खलु । अभावे कारणमाह । एता एतानि सख्यानि सालावृकाणां हृदयानि तेषां हृदयानि यथा वत्सादीनां विश्वासापन्नानां घातुकानि तद्वत् । अत्र वाजसनेयकं-- 'मैतदादृथा न वं स्त्रैणँ सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच' (शतपथ-ब्राह्मणम् ११।५।१।९) इति ।। ।।३।।

यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ।।१६।।

यत् । विऽरूपा । अचरम् । मर्त्येषु । अवसम् । रात्रीः । शरदः । चतस्रः । घृतस्य । स्तोकम् । सकृत् । अह्नः । आश्नाम् । तात् । एव । इदम् । ततृपाणा । चरामि ।।१६।।

यत् यदा विरूपा मनुष्यसंपर्काद् विगतसहजभूतदेवरूपा पत्यानु-कूल्येन नानारूपा वा मर्त्येषु मनुष्येषु अचरं तदानीं रात्रीः प्ररमयित्रीः चतस्रः शरदः अवसं न्यवसम् । अत्यन्तसंयोगे द्वितीया । तदानीं घृतस्य स्तोकं सकृदह्न आश्नाम् । तादेव तेनैव स्तोकेनाहम् इदं संप्रति तातृपाणा तृप्ता सती चरामि ।।

अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ।।

अन्तरिक्षऽप्राम् । रजसः । विऽमानीम् । उप । शिक्षामि । उर्वशीम् । वसिष्ठः । उप । त्वा । रातिः । सुऽकृतस्य । तिष्ठात् । नि । वर्तस्व । हृदयम् । तप्यते । मे ।।१७।।

अन्तरिक्षप्रां स्वतेजसान्तरिक्षस्य पूरयित्रीं तथा रजसः रञ्जकस्योदकस्य विमानीं निर्मात्रीम् उर्वशीं वसिष्ठः समानानां मध्येऽतिशयेन वासयिताहम् उप शिक्षामि वशं नयामि । सुकृतस्य शोभन-कर्मणः रातिः दाता पुरूरवाः त्वा त्वाम् उप तिष्ठात् उपतिष्ठतु । मे हृदयं तप्यते । अतो नि वर्तस्व । एवं राजोवाच ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति त्वा देवा इम आहुरैड यथेमेतद्भवसि मृत्युबन्धुः ।
प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयासे ।।

इति । त्वा । देवाः । इमे । आहुः । ऐड । यथा । ईम् । एतत् । भवसि । मृत्युऽबन्धुः । प्रऽजा । ते । देवान् । हविषा । यजाति । स्वःऽगे । ॐ इति । त्वम् । अपि । मादयासे ।।१८।।

हे ऐड पुरूरवः त्वा त्वाम् इमे देवाः इति आहुः । मृत्यबन्धुः मृत्योः बन्धकः मृत्योर्बन्धुभूतो वा मृत्युवशमप्राप्नुवंस्त्वं यथें यथा एतद्भवसि भविष्यसि प्रजा प्रकर्षेण जायमानस्त्वं ते तव संबन्धिनो यष्टव्यान् देवान् हविषा यजासि यजसि । स्वर्ग उ स्वर्ग एव त्वमपि मादयासे मादयसेऽस्माभिः सह । एवमाहुरित्यर्थः । यस्मादेवं करोषि तस्मादभिलाषं हित्वा सुखी भवेति सेयं पुरूरवसं प्रत्युवाच ।। ।।४।।

(ऋग्वेद ८ अष्टक, ५ अध्याय, १-४ वर्ग)

CC-0. Nepal Sanskrit Academy, Kathmandu

वीरगाथा

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः ॥१॥

आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनाम् । सम् । क्रन्दनः । अनिऽमिषः । एकऽवीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥१॥

अयमिन्द्रः आशुः शीघ्रकारी व्यापको वा शिशानः निशितः शत्रूणां भयजनक इत्यर्थः । क इव । वृषभो न भीमः । बिभेत्यस्मादिति भीमः । तादृशो वृषभ इव । स यथा तीक्ष्णाभ्यां शृङ्गाभ्यां भीमो भवति तद्वत् । अथवा शिशानस्तीक्ष्णमतिः । व्यत्ययेनात्मनेपदम् । वृषभो न भीमः वृषभो यथा शृङ्गाभ्यां भयजनकः तद्वच्छत्रूणां भयजनकश्च । घनाघनः घातकः शत्रूणाम् । हन्तेः पचाद्यचि 'हन्तेर्घश्च' (पाणिनिः ६।१।१२) इति द्विर्वचनमभ्यासस्याडागमो घत्वं च धात्वभ्यासयोः । चर्षणीनाम् चर्षणयो मनुष्याः । मनुष्याणां द्वेष्याणां क्षोभणः क्षोभयिता । संक्रन्दनः सम्यक्-क्रन्दयिता प्राणिनामाकर्षणेन प्रहारेण वा । अनिमिषः चक्षुर्निमेषरहितः । सर्वदा स्वयज्ञगमनयुद्धादिकार्येष्वनलस इत्यर्थः । एकवीरः । वीरयत्य-मित्रानिति वीरः । एकश्चासौ वीरश्च । अथवा एक एव विक्रान्तः । असाहाय्येन कार्यक्षम इत्यर्थः । ईदृशोऽयम् इन्द्रः शतं सेनाः साकं सह एकोद्योगेनैव अजयत् जयति ॥

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥

सम्ऽक्रन्दनेन । अनिऽमिषेण । जिष्णुना । युत्ऽकारेण । दुःऽच्य-

CC-0. Nepal Sanskrit Academy, Kathmandu

वनेन । धृष्णुना । तत् । इन्द्रेण । जयत । तत् । सहध्वम् । युधः । नरः । इषुऽहस्तेन । वृष्णा ॥२॥

अस्तु नामेन्द्र उक्तविधः तथाप्यस्माकं किमिति चेत् तत्राह । संक्रन्दनेनानिमिषे णचोक्तलक्षणेन जिष्णुना जयशीलेन युत्कारेण । योधनं युत् । युद्धकारिणा । 'कर्मण्यण्' (पाणिनिः ३।२।१) । दुश्च्यवनेन अन्यैरविचाल्येन । 'च्युङ प्रुङ गतौ' । 'छन्दसि गत्यर्थेभ्यः' (पाणिनिः ३।३।१२९) इति युच् । धृष्णुना धर्षकेण ईदृशेन इन्द्रेण तत् युद्धं जयत । तत् शत्रुबलं सहध्वम् अभिभवत । हे युधः योद्धारो हे नरः नेतारः । 'विभाषितं विशेषवचने बहुवचनम्' (पाणिनिः ८।१।७४) इति पूर्वस्याविद्यमानवत्त्वनिषेधादुत्तरं निहन्यते । पुनः कीदृशेनेन्द्रेणेति । इषुहस्तेन वृष्णा वर्षित्रा च ॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥

उत् । हर्षय । मघऽवन् । आयुधानि । उत् । सत्वनाम् । मामकानाम् । मनांसि । उत् । वृत्रऽहन् । वाजिनाम् । वाजिनानि । उत् । रथानाम् । जयताम् । यन्तु । घोषाः ॥१०॥

हे मघवन् इन्द्र अस्मदीयानि आयुधानि उद्धर्षय उत्कृष्टं हर्षय । प्रहरणेषूद्युक्तानि भवन्त्वित्यर्थः । मामकानां मदीयानां सत्वनां प्राणिनां सैनिकानां मनांसि च उत् हर्षय । हे वृत्रहन् इन्द्र वाजिनाम् अश्वानां वाजिनानि वेगाः उत् यन्तु । तथा जयतां रथानां घोषाः उत् यन्तु ॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥११॥

अस्माकम् । इन्द्रः । सम्ऽऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु । अस्माकम् । वीराः । उत्ऽतरे । भवन्तु । अस्मान् । ऊँ इति । देवाः । अवत । हवेषु ॥११॥

अस्माकं संबन्धिष्वेव समृतेषु परसेनां संप्राप्तेषु ध्वजेषु ध्वजवत्सु

CC-0. Nepal Sanskrit Academy, Kathmandu

सैनिकेषु इन्द्रः रक्षिता भवतु। तथा अस्माकं या इषवः सन्ति ताः एव जयन्तु शत्रून्। तथा अस्माकं वीराः भटाः उत्तरे उपरि भवन्तु। हे देवाः अस्माँ उ अस्मानेव अवत रक्षत हवेषु संग्रामेषु॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥

अमीषाम्। चित्तम्। प्रतिऽलोभयन्ती। गृहाण। अङ्गानि। अप्वे। परा। इहि। अभि। प्र। इहि। निः। दह। हृत्ऽसु। शोकैः। अन्धेन। अमित्राः। तमसा। सचन्ताम्॥१२॥

हे अप्वे पापाभिमानिनि देवते अमीषां योद्धॄणां शत्रूणां चित्तं प्रतिलोभयन्ती विमोहयन्ती सती अङ्गानि तेषामवयवान् शिरआदिकान् गृहाण स्वीकुरु। अभि प्रेहि अभिगच्छ। तेषां समीपं गत्वा च हृत्सु हृदयेषु शोकैः निर्दह नितरां भस्मीकुरु। ते अमित्राः अस्मच्छत्रवः अन्धेन तमसा सचन्तां संगच्छन्ताम्॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ॥१३॥

प्र। इत। जयत। नरः। इन्द्रः। वः। शर्म। यच्छतु। उग्राः। वः। सन्तु। बाहवः। अनाधृष्याः। यथा। असथ॥१३॥

हे नरः नेतारः संग्रामस्य निर्वोढारो योद्धारः प्रेत प्रकर्षेण गच्छत। गत्वा च जयत तान्प्रतिभटान्। तिङः परत्वात् 'तिङङतिङः' (पाणिनिः ८।१।२८) इति निघाताभावः। वः युष्माकम् इन्द्रः शर्म सुखं यच्छतु प्रयच्छतु। वः बाहवः उग्राः उद्गूर्णबलाः सन्तु भवन्तु। अनाधृष्याः अन्यैरनभिभाव्याः यथा यूयम् असथ भविष्यथ तथोग्राः सन्तु वो बाहवः॥ ॥२३॥

(ऋग्वेद ८ अष्टक, ५ अध्याय २२–२३ वर्ग;
शुक्लयजुर्वेद १७।३३–३४, ४२–४४, ४६)

CC-0. Nepal Sanskrit Academy, Kathmandu

असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना ।
तां गूहत तमसाऽपव्रतेन यथामी अन्यो अन्यं न जानन् ।।४७।।

असौ या सेना हे मरुतः, परेषां शत्रूणाम् अभि ऐति अभ्यागच्छति नः अस्मान् प्रति ओजसा बलेन स्पर्धमाना। तां सेनां गूहत व्याप्नुत । तमसा अपव्रतेन । व्रतमिति कर्मनाम । अपगतकर्मणा । येन तमसार्धव्याप्तानां नश्यन्ति कर्माणि तदपव्रतं तमः तेनापव्रतेन तमसा वा गूहत । यथामी अन्यो अन्यं न जानन् यथा अमी सैनिका अन्योन्यं परस्परं न जानीयुः ।

(शुक्लयजुर्वेद, १७ अध्याय)

CC-0. Nepal Sanskrit Academy, Kathmandu

लोभी

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥६॥

मोघम् । अन्नम् । विन्दते । अप्रऽचेताः । सत्यम् । ब्रवीमि । वधः । इत् । सः । तस्य । न । अर्यमणम् । पुष्यति । नो इति । सखायम् । केवलऽअघः । भवति । केवलऽआदि ॥

अदातारं दूषयति । अप्रचेताः अप्रकृष्टज्ञानः दाने चेतो मनो यस्य न भवति सः मोघं व्यर्थमेव अन्नं विन्दते लभते । 'विद्लृ लाभे' । तौदादिकः । 'शे मुचादीनाम्' (पाणिनिः ७।१।५९) इति नुमागमः । इदं सत्यं यथार्थमेवेति ब्रवीमि । ऋषिरहं वदामि न केवलं व्यर्थं किंतु तस्य पुरुषस्य सः वध इत् वध एवान्नं परामृशतः तच्छब्दस्य वधसामानाधिकरण्यात् । पुँल्लिङ्गता यथा 'णेरणौ यत्कर्म णौ चेत् स कर्ताऽनाध्याने' (पाणिनिः १।३।६७) इत्यत्र यत् कर्म स एव कर्तेति । अथवा स निरर्थको वध एव यः पुरुषः अर्यमणम् । उपलक्षणमिदम् । सर्वान् देवानर्यमादीन् न पुष्यति हविष्प्रदानेन न पोषयति नो नापि सखायं समानख्यानमभ्यागतमतिथिं मित्रवर्गं च न पोषयति । 'पुष पुष्टौ' । दैवादिकः। यच्छब्दाध्याहारादनिघातः । अत एव केवलादी । अदेः 'सुप्यजातौ णिनिस्ताच्छील्ये (पाणिनिः ३।२।७८) इति णिनिः । अत उपधालक्षणा वृद्धिः । केवलमसाक्षिकमन्नं भुञ्जानः सः केवलाघो भवति । केवलपापवान् भवति । अघमेव केवलं तस्य शिष्यते । नैहिकं नामुष्मिकमिति । तस्माद् यथाकथंचिद् दातव्यमित्यभिप्रायः ।

(ऋग्वेद ८ अष्टक, ६ अध्याय, २३ वर्ग)

CC-0. Nepal Sanskrit Academy, Kathmandu

तिम्रै निम्ति लिएर भोज्य घरमा आईरहेको म छु

गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि ।
ऊर्जं बिभ्रद् वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ।।

हे गृहाः, मा बिभीत भयं मुञ्चत मा वेपध्वम् । 'टुवेपृ कम्पने' । वेपतिः कम्पनार्थः । कम्पनं मुञ्चत । यतो वयं युष्मान् ऊर्जम् अन्नं बिभ्रतः धारयमाणान् अनुपक्षीणान् अन्नेनैव आइमसि आगताः स्मः । किंच अहमपि ऊर्जम् अन्नं बिभ्रद् धारयन् वः युष्मान् प्रति सुमनाः शोभनमनाः सुमेधाः शोभनप्रज्ञः सन् गृहानैमि गृहान् प्रत्यागच्छामि । मनसा मोदमानः हृष्यन् । आ इमः बहुवचनम् । एमि एकवचनम् । आत्मनि विकल्पेन बहुवचनं स्मर्यत इत्यदोषः ।।४१।।

(शुक्लयजुर्वेद, ३ अध्याय)

CC-0. Nepal Sanskrit Academy, Kathmandu

हाम्रो रहोस् राष्ट्र सधैँ समुन्नत

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥२२॥

जपति। आ ब्रह्मन् आ जायतां हे ब्रह्मन् ब्राह्मणः ब्रह्मवर्चसी। यज्ञाध्ययनशीलो ब्राह्मण आ जायतामित्यर्थः। राष्ट्रे। आ जायतां च राष्ट्रे राजन्यः शूरः इषव्यः। इषुभिः विध्यति इषव्यः। इषुषु वा साधुः इषव्यः। अतिव्याधी महारथः। अतिविध्यति द्विषन्तमित्यतिव्याधी महारथश्च। दोग्ध्री धेनुः राष्ट्रे आ जायतामिति सर्वत्र सम्बन्धः। वोढा अनड्वान् आशुः शीघ्रः सप्तिरश्वः। पुरन्धिर्योषा। पुरं शरीरं रूपादिगुणसमन्वितं धारयतीति पुरन्धिः। जिष्णू रथेष्ठाः। जयनशीलः रथे तिष्ठतीति रथेष्ठाः युयुत्सुः सभेयो युवा। सभामर्हति विद्यागुणचरित्रैः सभेयः युवा आ अस्य यजमानस्य आजायतां चास्य यजमानस्य धीरः पुत्रः। किंच निकामे निकामे नः पर्जन्यो वर्षतु प्रार्थनायामवश्यं भवतीति निकामः। अभ्यासो वीप्सार्थः। अस्माकं राष्ट्रे इत्यर्थः। फलवत्यः अतिशयेन फलयुक्ताः नोऽस्माकं राष्ट्रे ओषधयः पच्यन्ताम्। योगक्षेमो नः कल्पताम्। योगो द्रव्यादीनां संयोगः क्षेमस्तेषामेव परिपालनम्। योगश्च क्षेमश्चास्माकं क्लृप्तो भवतु। योगश्च क्षेमश्चेति द्वन्द्वः। तत्र नपुंसकलिङ्गता वा स्यात् द्विर्वचनं वा इति। तत्रच्छान्दसो विसर्जनीयो द्रष्टव्यः ॥२२॥

(शुक्लयजुर्वेद, २२ अध्याय)

CC-0. Nepal Sanskrit Academy, Kathmandu

सत्कर्मको भावना

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ।।१।।

यन्मनः जाग्रतः पुरुषस्य दूरं उदैति उद्गच्छति चक्षुःप्रभृतीन्यपेक्ष्य । यच्च दैवं देवो विज्ञानात्मा सोऽनेन गृह्यत इति दैवम् । उक्तंच 'मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवमि' ति । तदु सुप्तस्य । तदः स्थाने यदोवृत्तिः । उकारः समुच्चयार्थीयः । यच्च मनः सुप्तस्य तथैव तेनैव प्रकारेण एति । यच्च दूरंगमं दूरं गच्छतीति दूरंगमम् अतीतानागतवर्तमानव्यवहितविप्रकृष्टग्रहीतृ । ज्योतिषां श्रोत्रादीनां विज्ञाननेतॄणां मध्य एकमेव ज्योतिः । तत् मे मनः शिवसंकल्पम् । संकल्पः काममूलपदार्थस्य स्त्र्यादेः सुरूपताज्ञानवतः कामप्रभृति शान्तसंकल्पम् अस्तु भवतु ।।१।।

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।२।।

येन कर्माणि । येन मनसा सता कर्माणि । अपसः अप इति कर्मनाम तद्धितलोपः । अपस्विनः कर्मवतः । मनीषिणः मेधाविनः । यज्ञे कृण्वन्ति कुर्वन्ति । विदथेषु वेदनेषु यज्ञविधिविधानेषु धीराः धीमन्तः । यच्च अपूर्वम् न विद्यते पूर्वमिन्द्रियं यस्मात्तदपूर्वम् । यद्वा अपूर्वमनपरम् । यच्च यक्षं पूज्यम् । यच्च अन्तर्मध्ये प्रजानामास्ते । तन्मे मन इति व्याख्यातम् ।।२।।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंच न कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

यत्प्रज्ञानम् । यन्मनः प्रज्ञानं विशेषप्रतिपत्तिप्रज्ञाम् । उत अपिच । चेतः सामान्यप्रतिपत्तिचेतः । धृतिश्च प्रसिद्धा । यन्मनः अन्तर्ज्योतिरमृतं च प्रजासु । यस्मान्न ऋते येन च विना न किंचन कर्म क्रियते । तन्मे मन इति व्याख्यातम् ।।३।।

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ।।४।।

येनेदम् । येन मनसा इदं भूतं भूतकालं, भुवनं वर्तमानकालं, भविष्यत् भविष्यत्कालं च । परिगृहीतम् अमृतेन सर्वम् । येन च मनसा यज्ञस्तायते तन्यते । सप्तहोता । सप्त होतारो ह्यग्निष्टोमे भवन्ति । तन्मे मन इति व्याख्यातम् ।।४।।

यस्मिन्नृचः साम यजूँषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिँश्चित्तँ सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।

यस्मिन्नृचः । यस्मिन्मनसि ऋचः प्रतिष्ठिताः । यस्मिन्सामानि प्रतिष्ठितानि । यस्मिन् यजूंषि प्रतिष्ठितानि । कथमिव । रथनाभौ इव आराः । यस्मिन् चित्तं संज्ञानं सर्वं तस्य तस्यार्थस्य । ओतं निक्षिप्तं तन्तुसंततमिव कृतं प्रजानाम् । तन्मे मन इति व्याख्यातम् ।।५।।

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ।।६।।

सुषारथिः । यन्मनः मनुष्यान् । नेनीयते अत्यर्थं नयति । कथमिव । सुषारथिः कल्याणसारथिः अश्वान् इव यन्मनुष्यान् । यच्च मनः सुषारथिरिव । अभीशुभिः प्रग्रहैः वाजिन इव वेजनवतोऽश्वानिव यमयतीति शेषः । द्वे उपमे एकत्र नयनमन्यत्र नियमनमर्थः । यच्च हृत्प्रतिष्ठम् । तत्रोपलब्धेः । यच्च अजिरं जरारहितम् । यच्च जविष्ठं अतिशयेन गन्तृ । तन्मे मनः शिवसंकल्पमस्तु ।।६।।

(शुक्लयजुर्वेद, ३४ अध्याय)

CC-0. Nepal Sanskrit Academy, Kathmandu

राजालाई अथर्ववेदोक्त आशीर्वाद*

आ त्वा गन् राष्ट्रं सह वर्चसोदिहि प्राङ
विशां पतिरेकराट् त्वं वि राज ।
सर्वास्त्वा राजन् प्रदिशो
ह्वयन्तूपसद्यो नमस्यो भवेह ॥१॥

आ । त्वा । गन् । राष्ट्रम् । सह । वर्चसा । उत् । इहि । प्राङ । विशाम् । पतिः । एकराट् । त्वम् । वि । राज । सर्वाः । त्वा । राजन् । प्रदिशः । ह्वयन्तु । उपसद्यः । नमस्यः । भव । इह ॥१॥

हे राजन् त्वा त्वां राष्ट्रम् आगन् आगमत् । त्वं वर्चसा तेजसा सह उदिहि उदयस्व । विशां प्रजानां प्राङ अग्रगः पतिः पालकः सन् एकराट् एकराजः मुख्यः राजा सन् वि राज विशेषेण दीप्यस्व । सर्वाः प्रदिशः दिशः त्वा त्वां ह्वयन्तु स्वामित्वेन अनुजानन्तु । इह उपसद्यः प्राप्यः नमस्यः नमस्कार्यः च भव ।

आ त्वा गन् ।

'गम्' धातोः लुङि प्रथमपुरुषस्य एकवचने 'बहुलं छन्दस्यमाङ्योगेऽपि' (पाणिनिः ६।४।७५) इति अडागमाभावे 'च्लि लुङि' (पाणिनिः ३।१।४३) इति च्लिप्रत्यये गम् च्लि ति । 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः' (पाणिनिः २।४।८०) इति च्लेः लुकि गम् ति । 'इतश्च' (पाणिनिः ३।४।१००) इति इकारलोपे गम् त् । 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' (पाणिनिः ६।१।६८) इति तकारलोपे गम् ।

---

* यहाँ सायणभाष्य दिनुका साथै अरू विशेष व्याख्या पनि थपिएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

'भो नो धातोः' (पाणिनिः ८।२।६४) इति नत्वे गन् । 'व्यवहिताश्च' (पाणिनिः १।४।८२) इति आ त्वा गन् ।

उदिहि ।

उत्पूर्वस्य 'इण् गतौ' इति धातोः लोटि मध्यमपुरुषस्य एकवचने उदिहि ।

एकराट् त्वम् ।

'राजृ दीप्तौ' इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (पाणिनिः ३।२।६१) इति क्विप्प्रत्यये सर्वापहारिलोपे राज् । एक सु राज् सु इति स्थिते, 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (पाणिनिः २।१।४९) इति तत्पुरुषसमासे प्रातिपदिकसंज्ञायां विभक्तिलुकि च एकराज् । 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (पाणिनिः ८।२।३६) इति षत्वे एकराष् । 'झलां जशोऽन्ते' (पाणिनिः ८।२।३९) इति जश्त्वे एकराड् । 'खरि च' (पाणिनिः ८।४।५५) इति चर्त्वे एकराट् त्वम् ।

त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्च देवीः ।
वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व ततो न उग्रो वि भजा वसूनि ॥

त्वम् । विशः । वृणताम् । राज्याय । त्वाम् । इमाः । प्रदिशः । पञ्च । देवीः । वर्ष्मन् । राष्ट्रस्य । ककुदि । श्रयस्व । ततः । नः । उग्रः । वि । भज । वसूनि ॥२॥

हे राजन् त्वां विशः प्रजाः राज्याय वृणताम् भजन्ताम् । त्वाम् इमाः पञ्च पञ्चसङ्ख्याकाः देवीः देव्यः द्योतमानाः प्रदिशः दिशः पूर्वा दक्षिणा पश्चिमा उत्तरा तथा मूलस्थानं च राज्याय वृणताम् । राष्ट्रस्य वर्ष्मन् वर्ष्मणि शरीरे तत्र अपि ककुदि उन्नते स्थाने सिंहासने श्रयस्व आस्स्व । ततः उग्रः उद्‌गूर्णबलः सन् वसूनि धनानि नः अस्मभ्यं वि भज यथायोग्यं प्रयच्छ ।

वृणताम् ।

'वृञ् वरणे' इति धातोः आत्मनेपदे लोटि प्रथमपुरुषस्य बहुवचने

CC-0. Nepal Sanskrit Academy, Kathmandu

'क्र्यादिभ्यः श्ना' (पाणिनिः ३।१।८१) इति श्नाप्रत्यये वृ ना ऊ। 'प्वादीनां ह्रस्वः' (पाणिनिः ७।३।८०) इति ह्रस्वे वृ ना ऊ। 'आत्मनेपदेष्वनतः' (पाणिनिः ७।१।५) इति अति वृ ना अत। 'टित आत्मनेपदानां टेरे' (पाणिनिः ३।४।७९) इति एत्वे वृ ना अते। 'श्नाभ्यस्तयोरातः' (पाणिनिः ६।४।११२) इति आकारलोपे वृ न् अते। णत्वे वृणते। 'आमेतः' (पाणिनिः ३।४।९०) इति आमि वृणताम्।

देवीः।

देवी जस्। 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति पूर्वसवर्णदीर्घे देवीः।

वर्ष्मन्।

वर्ष्मन् ङि। 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति ङेः लुकि वर्ष्मन्। 'नलोपः प्रातिपदिकान्तस्य' (पाणिनिः ८।२।७) इति नलोपे प्राप्ते 'न ङिसम्बुद्ध्योः' (पाणिनिः ८।२।८) इति निषेधे वर्ष्मन्।

ककुदि।

ककुद् इति प्रादिपदिकस्य सप्तम्याः एकवचने ककुदि। 'अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्' इति ऋग्वेदे (६ अष्टके ३ अध्याये ४० वर्गे १६ मन्त्रः)। 'मूर्धा देवानां श्रेष्ठः दिवः द्युलोकस्य ककुत् उच्छ्रितः पृथिव्याः च पतिः अयम् अग्निः' इति सायणः। 'नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान्' इति श्रीमद्भागवते (५ स्कन्धे २५ अध्याये ७)। 'हलस्य ककुदि पृष्ठे' इति तट्टीकायां श्रीधरस्वामी।

वि भजा वसूनि।

वि भज वसूनि। 'द्व्यचोऽतस्तिङः' (पाणिनिः ६।३।१३५) इति संहितायां दीर्घे वि भजा वसूनि।

अच्छ त्वा यन्तु हविनः सजाता अग्निर्दूतो अजिरः सं चराते।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः ३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अच्छ । त्वा । यन्तु । हविनः । सजाताः । अग्निः । दूतः । अजिरः । सम् । चरातै । जायाः । पुत्राः । सुमनसः । भवन्तु । बहुम् । बलिम् । प्रति । पश्यासै । उग्रः ॥३॥

हे राजन् हविनः आहूताः सजाताः समानजन्मानः त्वा त्वाम् अच्छ यन्तु अभिगच्छन्तु । अजिरः शीघ्रः त्वदीयः दूतः अग्निः अग्निः इव सं चरातै संचरतु । तव जायाः पुत्राः च सुमनसः सन्तुष्टचित्ताः भवन्तु । उग्रः उद्गूर्णबलः त्वं बहुं बलिं करं प्रति पश्यासै प्रतिमुखम् आगतं पश्य ॥३॥

अच्छ ।

'अच्छ गत्यर्थवदेषु' (पाणिनिः १।४।६९) 'अच्छशब्दोऽव्ययमभिशब्दस्यार्थे वर्तते' इति काशिका ।

यन्तु ।

'इण् गतौ' इति धातोः लोटि प्रथमपुरुषस्य बहुवचने इ झि । अन्तादेशे इ अन्ति । 'इणो यण्' (पाणिनिः ६।४।८१) इति यणि य् अन्ति । 'एरुः' (पाणिनिः ३।४।८६) इति उत्वे यन्तु ।

हविनः ।

'ह्वेञ्' धातोः 'भावेऽनुपसर्गस्य' (पाणिनिः ३।३।७५) इति अप्प्रत्यये सम्प्रसारणे च हु आ अ । 'सम्प्रसारणाच्च' (पाणिनिः ६।१।१०८) इति पूर्वरूपे हु अ । 'सार्वधातुकार्धधातुकयोः' (पाणिनिः ७।३।८४) इति गुणे हो अ । अवादेशे हव । 'हवो हूतौ' इति अमरः (३।२।८) । हवप्रातिपदिकात् 'अत इनिठनौ' (पाणिनिः ५।२।११५) इति मतुबर्थे इनिप्रत्यये प्रथमायाः बहुवचने हविनः ।

अच्छ त्वा यन्तु हविनः सजाताः ।

'सामन्तस्य च तत्र दुष्टचरितं श्रुत्वा शिरः कम्पयन्
बाहुं हस्तिकरोपमं स शनकैः स्पृष्ट्वाब्रवीद् गर्वितम् ।
आहूतो यदि नैति विक्रमवशादेष्यत्यसौ मे वशम् ।'

CC-0. Nepal Sanskrit Academy, Kathmandu

इति मानदेवस्य दोलाद्रौ स्थितस्य स्तम्भाभिलेखस्य पद्यम्* अत्र स्मरणीयम् ।

अग्निर्दूतः ।

'उपचारो हि नामात्यन्तं विशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम् । यथा–अग्निमाणवकयोः' इति साहित्यदर्पणे (२ परिच्छेदे) ।

दूतो अजिरः ।

'प्रकृत्यान्तःपादमव्यपरे' (पाणिनिः ६।१।११५) इति प्रकृतिभावः ।

अजिरः ।

'अजिरः शीघ्रगन्तरि' इति वाचस्पत्यम् ।

सं चरातै ।

परस्मैपदिनः 'चर्' धातोः 'आशिषि लिङ्लोटौ' (पाणिनिः ३।३।१७३) इति आशिषि अर्थे लिङः प्राप्तिः । 'लिङर्थे लेट्' (पाणिनिः ३।४।७) इति तस्मिन् अर्थे लेट् । 'व्यत्ययो बहुलम्' (पाणिनिः ३।१।८५) ।

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन ॥

'...उपग्रहः परस्मैपदात्मनेपदे । ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते । प्रतीपमन्य ऊर्मिर्युध्यति । युध्यत इति प्राप्ते' इति सिद्धान्तकौमुदी । तथा एव अत्र परस्मैपदे प्राप्ते उपग्रहव्यत्ययेन आत्मनेपदम् । आत्मनेपदे प्रथमपुरुषस्य एकवचने शप्प्रत्यये चर् अ त । 'लेटोऽडाटौ' (पाणिनिः ३।४।९४) इति आडागमे चर् अ आ त । सवर्णदीर्घे चर् आ त । एत्वे चर् आते । 'वैतोऽन्यत्र' (पाणिनिः ३।४।९६) इति ऐत्वे चरातै ।

---

* वि. सं. २०३० मा काठमाडौंबाट नेपाल र एशियाली अध्ययन संस्थानद्वारा प्रकाशित धनवज्र वज्राचार्यको लिच्छविकालका अभिलेखको १२ पृष्ठ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रति पश्यासै ।

परस्मैपदिनः 'दृश्' धातोः आशिषि अर्थे लेट् । उपग्रहव्यत्ययेन आत्मनेपदम् । आत्मनेपदे मध्यमपुरुषस्य एकवचने शप्प्रत्यये दृश् अ थास् । 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (पाणिनिः ७।३।७८) इति पश्यादेशे पश्य अ थास् । पररूपे पश्य थास् । आडागमे दीर्घे च पश्या थास् । 'थासः से' (पाणिनिः ३।४।८०) इति से इति आदेशे पश्या से । 'वैतोऽन्यत्र' (पाणिनिः ३।४।९६) इति ऐत्वे पश्यासै ।

अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु । अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि ४॥

अश्विना । त्वा । अग्रे । मित्रावरुणा । उभा । विश्वे । देवाः । मरुतः । त्वा । ह्वयन्तु । अध । मनः । वसुदेयाय । कृणुष्व । ततः । नः । उग्रः । वि । भज । वसूनि ॥४॥

हे राजन् त्वा त्वाम् अग्रे प्रथमम् अश्विना अश्विनौ देवौ उभा उभौ मित्रावरुणा मित्रावरुणौ च तथा विश्वे देवाः मरुतः च ह्वयन्तु आह्वयन्तु । अध अथ वसुदेयाय धनप्रदानाय मनः कृणुष्व कुरु । ततः उग्रः उद्गूर्णबलः सन् वसूनि धनानि नः अस्मभ्यं वि भज यथायोग्यं प्रयच्छ ।

अश्विना ।

अश्विन् औ । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति आ इति आदेशे अश्विना ।

मित्रावरुणा ।

मित्रः च वरुणः च इति द्वन्द्वसमासे 'देवताद्वन्द्वे च' (पाणिनिः ६।३।२६) इति पूर्वपदस्य आनङादेशे मित्रावरुण औ । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति आ इति आदेशे मित्रावरुणा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

उभा ।

उभ औ । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति आ इति आदेशे उभा ।

अधा मनः ।

अध मनः । 'निपातस्य च' (पाणिनिः ६।३।१३६) इति संहितायां दीर्घे अधा मनः ।

वसुदेयाय ।

'दा' धातोः 'कृत्यल्युटो बहुलम्' (पाणिनिः ३।३।११३) ति भावे 'अचो यत्' (पाणिनिः ३।१।९७) इति यत्प्रत्यये दा य । 'ईद् यति' (पाणिनिः ६।४।६५) इति ईत्त्वे दी य । 'सार्वधातुकार्धधातुकयोः' (पाणिनिः ७।३।८४) इति गुणे देय । वसुनः धनस्य दानं वसुदेयम् ।

कृणुष्व ।

परस्मैपदिनः 'कृवि'धातोः इकारस्य इत्त्वात् 'इदितो नुम् धातोः' (पाणिनिः ७।१।५८) इति नुमागमे कृन् व् । णत्वे कृण् व् । 'व्यत्ययो बहुलम्' (पाणिनिः ३।१।८५) इति उपग्रहव्यत्ययेन आत्मनेपदे लोटि मध्यमपुरुषस्य एकवचने कृण् व् थास् । 'धिन्विकृण्व्योर च' (पाणिनिः ३।१।८०) इति शपः अपवादे उप्रत्यये अकारे अन्तादेशे च कृण् अ उ थास् । 'अतो लोपः' (पाणिनिः ६।४।४८) इति अकारस्य लोपे कृण् उ थास् । 'थासः से' (पाणिनिः ३।४।८०) इति से इति आदेशे कृणुसे । षत्वे कृणुषे । 'सवाभ्यां वामौ' (पाणिनिः ३।४।९१) इति वकारादेशे कृणुष्व ।

आ प्र द्रव परमस्याः परावतः शिवे ते द्यावापृथिवी उभे स्ताम् ।
तदयं राजा वरुणस्तथाह स त्वायमह्वत् स उपेदमेहि ॥५॥

आ । प्र । द्रव । परमस्याः । परावतः । शिवे । ते । द्यावापृथिवी । उभे । स्ताम् । तत् । अयम् । राजा । वरुणः । तथा । आह । सः । त्वा । अयम् । अह्वत् । सः । उप । इदम् । आ । इहि ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

हे राजन् परमस्याः अत्यन्तं परावतः दूरदेशात् आ प्र द्रव शीघ्रम् आगच्छ । ते तव उभे द्यावापृथिवी द्यावापृथिव्यौ शिवे मङ्गलकारिण्यौ स्ताम् भवताम् । तत् अयं वरुणः राजा तथा आह ब्रूते सः अयं वरुणः त्वा त्वाम् अह्वत् आह्वयति । सः त्वम् इदम् उपेहि उपागच्छ ।

परमस्याः ।

परमा ङसि । सर्वनामसंज्ञायाः अभावे अपि 'व्यत्ययो बहुलम्' (पाणिनिः ३।१।८५) '...बहुलग्रहणं सर्वविधिव्यभिचारार्थम्' इति काशिका । इति व्यत्ययेन सर्वनामसंज्ञा । 'सर्वनाम्नः स्याड्ढ्रस्वश्च' (पाणिनिः ७।३।११४) इति स्याडागमे ह्रस्वे च परमस्याः ।

परावतः ।

परावत्प्रातिपदिकस्य पञ्चम्याः एकवचने परावतः । 'सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गन्तवा उ ...' इति ऋग्विदे (८ अष्टके ५ अध्याये ३ वर्गे १४ मन्त्रः) । 'सुदेवः त्वया सह सुक्रीडः पतिः अद्य प्रपतेत् । अत्रैव प्रपततु । अथवा अनावृत् अनावृत्तः सन् परमां परावतं दूरादपि दूरदेशं गन्तवै गन्तुं महाप्रस्थानगमनं कुर्यात्' इति सायणः ।

द्यावापृथिवी ।

द्यौः च पृथिवी च इति द्वन्द्वसमासे 'दिवसश्च पृथिव्याम्' (पाणिनिः ६।३।३०) इति दिव्स्थाने द्यावा इति आदेशे द्यावापृथिवी । द्यावापृथिवी औ । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति औ इति एतस्य लुकि द्यावापृथिवी ।

द्यावापृथिवी उभे ।

'ईदूदेद् द्विवचनं प्रगृह्यम्' (पाणिनिः १।१।११) इति प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' (पाणिनिः ६।१।१२५) इति प्रकृतिभावः ।

अह्वत् ।

'ह्वेञ्' धातोः परस्मैपदे लुङि प्रथमपुरुषस्य एकवचने अडागमे च्लिप्रत्यये अ ह्वा च्लि ति । 'लिपिसिचिह्वश्च' (पाणिनिः ३।१।५३)

CC-0. Nepal Sanskrit Academy, Kathmandu

इति च्लिस्थाने अङादेशे अ ह्वा अ ति । 'आतो लोप इटि च' (पाणिनिः ६।४।६४) इति आकारलोपे अ ह्व् अ ति । 'इतश्च' (पाणिनिः ३।४।१००) इति इकारलोपे अह्वत् । 'छन्दसि लुङलङलिटः' (पाणिनिः ३।४।६) इति वर्तमाने लुङ ।

इन्द्रेन्द्र मनुष्याः परेहि सं ह्यज्ञास्था वरुणैः संविदानः ।
स त्वायमह्वत् स्वे सधस्थे स देवान् यक्षत् स उ कल्पयाद् विशः ॥

इन्द्र । इन्द्र । मनुष्याः । परा । इहि । सम् । हि । अज्ञास्थाः । वरुणैः । संविदानः । सः । त्वा । अयम् । अह्वत् । स्वे । सधस्थे । सः । देवान् । यक्षत् । सः । उ । कल्पयात् । विशः ॥६॥

इन्द्रेन्द्र हे इन्द्र मनुष्याः मनुष्यान् परेहि आगच्छ । हि यस्मात् कारणात् वरुणैः वरुणेन संविदानः ऐकमत्यं प्राप्तः सम् अज्ञास्थाः ज्ञातवान् असि । सः अयम् इन्द्रः त्वा त्वाम् अह्वत् आह्वयति । स्वे स्वकीये सधस्थे सहस्थाने स्वराष्ट्रे सः राजा देवान् यक्षत् यजतु । सः उ सः एव राजा विशः प्रजाः कल्पयात् स्वस्वव्यापारेषु कल्पयतु नियुङ्क्ताम् ।

इन्द्रेन्द्र ।

'वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु' (पाणिनिः ८।१।८) इति संमतौ इन्द्रशब्दस्य द्वित्वे इन्द्रेन्द्र ।

मनुष्याः परेहि ।

'व्यत्ययो बहुलम्' (पाणिनिः ३।१।८५) '...धुरि दक्षिणायाः । दक्षिणस्यामिति प्राप्ते' इति सिद्धान्तकौमुदी । तथा एव अत्र मनुष्यान् परेहि इति प्राप्ते सुपां व्यत्ययेन मनुष्याः परेहि ।

सं हि अज्ञास्थाः ।

'संप्रतिभ्यामनाध्याने' (पाणिनिः १।३।४६) इति सम्पूर्वात् 'ज्ञा' धातोः आत्मनेपदम् । 'व्यवहिताश्च' (पाणिनिः १।४।८२) इति सं हि अज्ञास्थाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वरुणैः ।

वरुणेन इति प्राप्ते 'व्यत्ययो बहुलम्' (पाणिनिः ३।१।८५) इति सुपां व्यत्ययेन वरुणैः ।

संविदानः ।

'समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः' (पाणिनिः १।३।२९) इति सम्पूर्वाद् 'विद्' धातोः आत्मनेपदे शानजादेशे संविदानः ।

सधस्थे ।

'सध मादस्थयोश्छन्दसि' (पाणिनिः ६।३।९६) इति सहस्थाने सधादेशः ।

यक्षत् ।

'यज्'धातोः परस्मैपदे आशिषि अर्थे लेटि प्रथमपुरुषस्य एकवचने 'सिब् बहुलं लेटि' (पाणिनिः ३।१।३४) इति सिप्प्रत्यये यज् स् ति । 'लेटोऽडाटौ' (पाणिनिः ३।४।९४) इति अडागमे यज् स् अ ति । 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (पाणिनिः ८।२।३६) इति षत्वे यष् स् अ ति । 'षढोः कः सि' (पाणिनिः ८।२।४१) इति ककारादेशे यक् स् अ ति । षत्वे यक् ष् अ ति यक्षति । 'इतश्च लोपः परस्मैपदेषु' (पाणिनिः ३।४।९७) इति इकारलोपे यक्षत् ।

कल्पयात् ।

'कृपू सामर्थ्ये' इति धातोः णिचि 'पुगन्तलघूपधस्य च' (पाणिनिः ७।३।८६) इति गुणे कर्पि । 'कृपो रो लः' (पाणिनिः ८।२।१८) इति लकारादेशे कल्पि । कल्पिधातोः परस्मैपदे आशिषि अर्थे लेटि प्रथम-पुरुषस्य एकवचने शपि गुणे अयादेशे कल्पयति । आडागमे कल्पयाति । इकारलोपे कल्पयात् ।

पथ्या रेवतीर्बहुधा विरूपाः सर्वाः सङ्गत्य वरीयस्ते अक्रन् ।
तास्त्वा सर्वाः संविदाना ह्वयन्तु दशमीमुग्रः सुमना वशेह ॥

पथ्याः । रेवतीः । बहुधा । विरूपाः । सर्वाः । संगत्य । वरीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ते । अक्रन् । ताः । त्वा । सर्वाः । संविदानाः । ह्वयन्तु । दशमीम् । उग्रः । सुमनाः । वश । इह ॥७॥

हे राजन् बहुधा विरूपाः विविधाकाराः पथ्याः मार्गहितकारिण्यः रेवतीः आपः ताः सर्वाः संगत्य ते तव वरीयः शुभम् अक्रन् कुर्वन्तु । ताः सर्वाः संविदानाः ऐकमत्यं प्राप्ताः सत्यः त्वा त्वां ह्वयन्तु आह्वयन्तु । इह उग्रः उद्‌गूर्णबलः त्वं सुमनाः सन्तुष्टचित्तः सन् दशमीं चरमावस्थां वश इच्छ ।

रेवतीः ।

रेवती जस् । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (पाणिनिः ७।१।३९) इति पूर्वसवर्णदीर्घे रेवतीः ।

ते अक्रन् ।

'प्रकृत्यान्तःपादमव्यपरे' (पाणिनिः ६।१।११५) इति प्रकृतिभावः ।

अक्रन् ।

कृधातोः परस्मैपदे लुङि प्रथमपुरुषस्य बहुवचने अडागमे च्लिप्रत्यये अ कृ च्लि झि । 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः' (पाणिनिः २।४।८०) इति च्लेः लुकि अ कृ झि । अन्तादेशे अ कृ अन्ति । यणि अक्रन्ति । 'इतश्च' (पाणिनिः ३।४।१००) इति इकारलोपे अक्रन्त् । संयोगान्तस्य लोपे अक्रन् । 'छन्दसि लुङ्लङ्लिटः' (पाणिनिः ३।४।६) इति लोडर्थे लुङ् ।

दशमीम् ।

'दशमीं नवतिसंवत्सरोर्ध्वभाविनीं वर्षदशकात्मिकां चरमावस्थाम्' इति सायणः । 'अविरलमधुबिन्दुपिङ्गलपद्मजालकितां सरसीमिवाभ्यवगाढां दशां चतुर्थीमुत्सृजन्तमनवरतमवतंसशङ्खैरामन्द्रकर्णजालदुन्दुभिध्वनिभिः पञ्चमीप्रवेशमङ्गलारम्भमिव सूचयन्तं... दर्पशातमपश्यत्' इति हर्षचरिते (२ उच्छ्वासे) । चतुर्थी दशा त्रिंशच्चत्वारिंशद्वर्षान्तरालं वयः । पञ्चमी दशा चत्वारिंशत्पञ्चाशद्वर्षान्तरालं वयः । (अयम् अर्थः पाण्डुरङ्गवामनकाणेपण्डितस्य हर्षचरितव्याख्यायां १२९ पृष्ठे अग्रवालोपनाम्नः वासुदेवशरणस्य हर्षचरितव्याख्यायां ४१ पृष्ठे वर्तते ।)

CC-0. Nepal Sanskrit Academy, Kathmandu

वश ।

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानेन प्रकाशितस्य अथर्ववेदस्य (१ भागे २६१ पृष्ठे) मूले वश इति रूपं वर्तते । तत्र एव टिप्पण्यां पाठान्तरत्वेन वस इति रूपं च वर्तते । तत्रैव सायणभाष्ये 'वस निवस, जरापर्यन्तं स्वकीयं राज्यं निष्कण्टकं भुङ्क्ष्वेत्यर्थः' इति लिखितं वर्तते । माधवीयधातुवृत्तौ भ्वादौ 'वस निवासे' । वसति (९८५) । अदादौ 'वस आच्छादने' । वस्ते (१३) । चुरादौ 'वस स्नेहनच्छेदापहरणेषु' । वासयति (२०९) । चुरादौ एव 'वस निवासे' । वसयति (३९६) । अदादौ 'वश कान्तौ' । वष्टि (७०) इति धातवः दृश्यन्ते । अतः लोटः मध्यमपुरुषस्य एकवचने वश इति रूपं न सिद्ध्यति । 'व्यत्ययो बहुलम्' (पाणिनिः ३।१।८५) 'यथायथं विकरणाः शबादयो विहितास्तेषां छन्दसि विषये बहुलं व्यत्ययो भवति । ... आण्डा शुष्मस्य भेदति । भिनत्तीति प्राप्ते । स च न मरति । न म्रियत इति प्राप्ते' इति काशिका । 'वश कान्तौ' इति अदादौ पठितस्य वश्धातोः लोटि मध्यम-पुरुषस्य एकवचने उड्ढि इति रूपं भवति । तत्र विकरणव्यत्ययेन शपः अलुकि लोटि मध्यमपुरुषस्य एकवचने वश इति रूपं सम्भवति । तस्य अर्थः च इच्छ इति ।

दशमीं वश इति एतस्य अर्थः शतवर्षात्मकम् आयुः इच्छ इति सम्भवति । अयम् अर्थः विद्वद्भिः परीक्ष्यः ।

(अथर्ववेद, ३ काण्ड, १ अनुवाक, ४ सूक्त)

CC-0. Nepal Sanskrit Academy, Kathmandu

विद्यार्थी

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस ॥१॥

तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत २॥

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।
अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत् ॥३॥

स होवाच पितरं तत कस्मै मां दास्यसीति । द्वितीयं तृतीयं तं होवाच मृत्यवे त्वा ददामीति ॥४॥

बहूनामेमि प्रथमो बहूनामेमि मध्यमः ।
किंस्विद् यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥५॥

अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे ।
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥६॥

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् ।
तस्यैतां शान्ति कुर्वन्ति हर वैवस्वतोदकम् ॥७॥

आशाप्रतीक्षे संगतं सूनृतां च इष्टापूर्ते पुत्रपशूँश्च सर्वान् ।
एतद् वृङक्ते पुरुषस्याऽल्पमेधसो यस्याऽनश्नन् वसति ब्राह्मणो गृहे ॥८॥

तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्यः ।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व ॥९॥

शान्तसङ्कल्पः सुमना यथा स्याद् वीतमन्युर्गौतमो माभि मृत्यो ।
त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत् त्रयाणां प्रथमं वरं वृणे ॥१०॥

यथा पुरस्ताद् भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः ।
सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान् मृत्युमुखात् प्रमुक्तम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

स्वर्गे लोके न भयं किञ्चनाऽस्ति न तत्र त्वं न जरया बिभेति ।
उभे तीर्त्वाशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥१२॥

स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥१३॥

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम् ॥१४॥

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा ।
स चाऽपि तत् प्रत्यवदद् यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः ॥१५॥

तमब्रवीत् प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण ॥१६॥

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत् तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति ॥१७॥

त्रिणाचिकेतस्त्रयमेतद् विदित्वा य एवं विद्वाँश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥१८॥

एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण ।
एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ॥१९॥

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद् विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥२०॥

देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयमणुरेष धर्मः ।
अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ॥२१॥

देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ ।
वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् २२॥

शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ॥२३॥

एततुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च ।
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामाँश्छन्दतः प्रार्थयस्व ।
इमा रामाः सरथाः सतूर्या न हीदृशा लम्भनीया मनुष्यैः ।
आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ।।२५।।

श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ।।२६।।

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत् चेत्वा ।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ।।२७।।

अजीर्यताममृतानामुपेत्य जीर्यन् मर्त्यः क्वधःस्थ प्रजानन् ।
अभिध्यायन् वर्ण रतिप्रमोदानतिदीर्घे जीविते को रमेत ।।२८।।

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत् ।
योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ।।२९।।

(कठोपनिषद्, १ अध्याय, १ वल्ली)

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः ।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद् य उ प्रेयो वृणीते ।।१।।

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ।।२।।

स त्वं प्रियान् प्रियरूपाँश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः ।
नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ।।३।।

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ।
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त ।।४।।

(कठोपनिषद, १ अध्याय, २ वल्ली)

CC-0. Nepal Sanskrit Academy, Kathmandu

केलाउँदै सब कुरा आत्मा नै खोज्नुपर्दछ

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद् वृत्तमुपाकरिष्यन् ॥१॥

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन् वा अरेऽहमस्मात् स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥२॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् स्यां न्वहं तेनामृताहो ३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥३॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहीति ॥४॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधद्धन्त तर्हि भवत्येतद् व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥५॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं

CC-0. Nepal Sanskrit Academy, Kathmandu

भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ॥६॥

ब्रह्म तं परादाद् योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद् योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान् वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा ॥७॥

(बृहदारण्यकोपनिषद्, ४ अध्याय, ५ ब्राह्मण)

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

विश्रान्ति

रामायण–खण्ड

यत्रो देश र कालको अवधिमा प्राचीन गाथा–श्रुति
पाइन्छन् जति ती सबैकन यहाँ केलाउँदामा पनि ।
सच्चा मानव–धर्म–पालक कुनै पाइन्न जल्ले सम
ती श्रीराम बसीरहून् हृदयमा सन्मार्ग देखाउन ।।

वि. सं. १९९६।२।४।४

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

अयोध्याको वर्णन

(वाल्मीकिरामायण, बालकाण्ड)

सरयूको किनारामा बसेको लोकविश्रुत ।
ठूलो राम्रो जनपद थियो कोशलनामक ।।

।। १ ।।

अन्नपात त्यहाँ फल्थे राम्रोसँग, प्रजाजन ।
थिए प्रसन्न, तिनको रहन्थ्यो हातमा धन ।।

।। २ ।।

प्रख्यात मनु राजाले बसाएको महापुर ।
अयोध्या राजधानीमा बस्तथे कोशलेश्वर ।।

।। ३ ।।

अयोध्याको थियो दैर्घ्य अठचालीस कोसको ।
त्यो अयोध्या थियो चौडा बाह्र कोस प्रमाणको ।।

।। ४ ।।

मिलाएर बनाएका वारपार हुने गरी ।
ठूला सडकले राम्रो देखिएको थियो पुरी ।।

।। ५ ।।

अयोध्यामा दिनदिनै छर्किन्थे जल मार्गमा ।
राम्रा राम्रा फूलहरू राखिन्थे ठाउँठाउँमा ।।

।। ६ ।।

बलिया बलिया ढोका अयोध्यापुरका थिए ।
तिनलाई समयमा उघार्थे बन्द गर्दथे ।।

।। ७ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

नाना प्रकारका जान्ने कालीगढ त्यहाँ थिए ।
धेरै किसिमका यन्त्र, ज्याबहाल त्यहाँ थिए ।।

।। ८ ।।

कथा सुनाउँदै हिँड्ने थिए केही त्यहाँ जन ।
राजाहरूको पुख्यौली भन्ने केही थिए जन ।।

।। ९ ।।

न ततर्प समायान्तं पश्यमानो नराधिपः ।
अवतार्य सुमन्त्रस्तु राघवं स्यन्दनोत्तमात् ॥३०॥

पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् ।
स तं कैलासशृङ्गाभं प्रासादं रघुनन्दनः ॥३१॥

आरुरोह नृपं द्रष्टुं सहसा तेन राघवः ।
सप्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके ॥३२॥

नाम स्वं श्रावयन् रामो ववन्दे चरणौ पितुः ।
तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ॥३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजम् ।
तस्मै चाभ्युद्यतं सम्यङ्मणिकाञ्चनभूषितम् ।।३४।।

दिदेश राजा रुचिरं रामाय परमासनम् ।
तथासनवरं प्राप्य व्यदीपयत राघवः ।।३५।।

स्वयैव प्रभया मेरुमुदये विमलो रविः ।
तेन विभ्राजिता तत्र सा सभाऽपि व्यरोचत ।।३६।।

विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना ।
तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम् ।।३७।।

अलंकृतमिवात्मानमादर्शतलसंस्थितम् ।
स तं सुस्थितमाभाष्य पुत्रं पुत्रवतां वरः ।।३८।।

उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ।
ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ।।३९।।

उत्पन्नस्त्वं गुणज्येष्ठो मम रामात्मजः प्रियः ।
त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः ।।४०।।

तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ।
कामतस्त्वं प्रकृत्यैव निर्णीतो गुणवानिति ।।४१।।

गुणवत्यपि तु स्नेहात् पुत्र वक्ष्यामि ते हितम् ।
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ।।४२।।

कामक्रोधसमुत्थानि त्यजस्व व्यसनानि च ।
परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ।।४३।।

अमात्यप्रभृतीः सर्वाः प्रजाश्चैवानुरञ्जय ।
कोष्ठागाराऽयुधागारैः कृत्वा संनिचयान् बहून् ।।४४।।

इष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम् ।
तस्य नन्दन्ति मित्राणि लब्ध्वाऽमृतमिवामराः ।।४५।।

तस्मात् पुत्र त्वमात्मानं नियम्यैवं समाचर ।
तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ।।४६।।

CC-0. Nepal Sanskrit Academy, Kathmandu

त्वरिताः शीघ्रमागत्य कौसल्यायै न्यवेदयन् ।
सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥४७॥

व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ।
अथाभिवाद्य राजानं रथमारुह्य राघवः ।
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥४८॥

ते चापि पौरा नृपतेर्वचस्तच्छ्रुत्वा तदालाभमिवेष्टमाशु ।
नरेन्द्रमामन्त्र्य गृहाणि गत्वा देवान् समानर्चुरभिप्रहृष्टाः ॥४९॥

चतुर्थः सर्गः

गतेष्वथ नृपो भूयः पौरेषु सह मन्त्रिभिः ।
मन्त्रयित्वा ततश्चक्रे निश्चयज्ञः स निश्चयम् ॥१॥

श्व एव पुष्यो भविता श्वोऽभिषेच्यस्तु मे सुतः ।
रामो राजीवपत्राक्षो युवराज इति प्रभुः ॥२॥

अथान्तर्गृहमाविश्य राजा दशरथस्तदा ।
सूतमामन्त्रयामास रामं पुनरिहाऽनय ॥३॥

प्रतिगृह्य तु तद्वाक्यं सूतः पुनरुपाययौ ।
रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥४॥

द्वाःस्थैरावेदितं तस्य रामायाऽगमनं पुनः ।
श्रुत्वैव चापि रामस्तं प्राप्तं शङ्काऽन्वितोऽभवत् ॥५॥

प्रवेश्य चैनं त्वरितो रामो वचनमब्रवीत् ।
यदागमनकृत्यं ते भूयस्तद् ब्रूह्यशेषतः ॥६॥

तमुवाच ततः सूतो राजा त्वां द्रष्टुमिच्छति ।
श्रुत्वा प्रमाणं तत्र त्वं गमनायेतराय वा ॥७॥

इति सूतवचः श्रुत्वा रामोऽपि त्वरयाऽन्वितः ।
प्रययौ राजभवनं पुनर्द्रष्टुं नरेश्वरम् ॥८॥

तं श्रुत्वा समनुप्राप्तं रामं दशरथो नृपः ।
प्रवेशयामास गृहं विवक्षुः प्रियमुत्तमम् ॥९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रविशन्नेव च श्रीमान् राघवो भवनं पितुः ।
ददर्श पितरं दूरात् प्रणिपत्य कृताञ्जलिः ॥१०॥

प्रणमन्तं तमुत्थाप्य संपरिष्वज्य भूमिपः ।
प्रदिश्य चासनं चास्मै रामं च पुनरब्रवीत् ॥११॥

राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा यथेप्सिताः ।
अन्नवद्भिः क्रतुशतैर्यथेष्टं भूरिदक्षिणैः ॥१२॥

जातमिष्टमपत्यं मे त्वमद्यानुपमं भुवि ।
दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥१३॥

अनुभूतानि चेष्टानि मया वीर सुखान्यपि ।
देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः ॥१४॥

न किञ्चिन्मम कर्तव्यं तवान्यत्राभिषेचनात् ।
अतो यत्त्वामहं ब्रूयां तन्मे त्वं कर्तुमर्हसि ॥१५॥

अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपम् ।
अतस्त्वां युवराजानमभिषेक्ष्यामि पुत्रक ॥१६॥

अपि चाद्याऽशुभान् राम स्वप्नान् पश्यामि राघव ।
सनिर्घाता दिवोल्काश्च पतन्ति हि महास्वनाः ॥१७॥

अवष्टब्धं च मे राम नक्षत्रं दारुणग्रहैः ।
आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥१८॥

प्रायेण च निमित्तानामीदृशानां समुद्भवे ।
राजा हि मृत्युमाप्नोति घोरां चापदमृच्छति ॥१९॥

तद् यावदेव मे चेतो न विमुह्यति राघव ।
तावदेवाभिषिञ्चस्व चला हि प्राणिनां मतिः ॥२०॥

अद्य चन्द्रोऽभ्युपगमत् पुष्यात्पूर्वं पुनर्वसुम् ।
श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥२१॥

तत्र पुष्येऽभिषिञ्चस्व मनस्त्वरयतीव माम् ।
श्वस्त्वाहमभिषेक्ष्यामि यौवराज्ये परंतप ॥२२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

तस्मात्त्वयाऽद्यप्रभृति निशेयं नियतात्मना ।
सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥२३॥

सुहृदश्चाप्रमत्तास्त्वां रक्षन्त्वद्य समन्ततः ।
भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥२४॥

विप्रोषितश्च भरतो यावदेव पुरादितः ।
तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥२५॥

कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः ।
ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेन्द्रियः ॥२६॥

किं नु चित्तं मनुष्याणामनित्यमिति मे मतम् ।
सतां च धर्मनित्यानां कृतशोभि च राघव ॥२७॥

इत्युक्तः सोऽभ्यनुज्ञातः श्वो भाविन्यभिषेचने ।
व्रजेति रामः पितरमभिभाष्याऽभ्ययाद् गृहम् ॥२८॥

प्रविश्य चात्मनो वेश्म राज्ञाऽदिष्टेऽभिषेचने ।
तत्क्षणादेव निष्क्रम्य मातुरन्तःपुरं ययौ ॥२९॥

तत्र तां प्रवणामेव मातरं क्षौमवासिनीम् ।
वाग्यतां देवतागारे ददर्शाऽयाचतीं श्रियम् ॥३०॥

प्रागेव चागता तत्र सुमित्रा लक्ष्मणस्तथा ।
सीता चानायिता श्रुत्वा प्रियं रामाभिषेचनम् ॥३१॥

तस्मिन् कालेऽपि कौसल्या तस्थावामीलितेक्षणा ।
सुमित्रयाऽन्वास्यमाना सीतया लक्ष्मणेन च ॥३२॥

श्रुत्वा पुष्ये च पुत्रस्य यौवराज्येऽभिषेचनम् ।
प्राणायामेन पुरुषं ध्यायमाना जनार्दनम् ॥३३॥

तथा सनियमामेव सोऽभिगम्याभिवाद्य च ।
उवाच वचनं रामो हर्षयंस्तामिदं वरम् ॥३४॥

अम्ब पित्रा नियुक्तोऽस्मि प्रजापालनकर्मणि ।
भविता श्वोऽभिषेको मे यथा मे शासनं पितुः ॥३५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

सीतयाऽप्युपवस्तव्या रजनीयं मया सह ।
एवमुक्तमुपाध्यायैः स हि मामुक्तवान् पिता ।।३६।।

यानि यान्यत्र योग्यानि श्वो भाविन्यभिषेचने ।
तानि मे मङ्गलान्यद्य वैदेह्याश्चैव कारय ।।३७।।

एतच्छ्रुत्वा तु कौसल्या चिरकालाभिकाङ्क्षितम् ।
हर्षबाष्पाकुलं वाक्यमिदं राममभाषत ।।३८।।

वत्स राम चिरं जीव हतास्ते परिपन्थिनः ।
ज्ञातीन् मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय ।।३९।।

कल्याणे बत नक्षत्रे मया जातोऽसि पुत्रक ।
येन त्वया दशरथो गुणैराराधितः पिता ।।३०।।

अमोघं बत मे क्षान्तं पुरुषे पुष्करेक्षणे ।
येयमिक्ष्वाकुराज्यश्रीः पुत्र त्वां संश्रयिष्यति ।।४१।।

इत्येवमुक्तो मात्रा तु रामो भ्रातरमब्रवीत् ।
प्राञ्जलिं प्रह्वमासीनमभिवीक्ष्य स्मयन्निव ।।४२।।

लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुन्धराम् ।
द्वितीयं मेऽन्तरात्मानं त्वामियं श्रीरुपस्थिता ।।४३।।

सौमित्रे भुङ्क्ष्व भोगांस्त्वमिष्टान् राज्यफलानि च ।
जीवितं चापि राज्यं च त्वदर्थमभिकामये ।।४४।।

इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च ।
अभ्यनुज्ञाप्य सीतां च ययौ स्वं च निवेशनम् ।।४५।।

पञ्चमः सर्गः

संदिश्य रामं नृपतिः श्वोभाविन्यभिषेचने ।
पुरोहितं समाहूय वसिष्ठमिदमब्रवीत् ।।१।।

CC-0. Nepal Sanskrit Academy, Kathmandu

गच्छोपवासं काकुत्स्थं कारयाद्य तपोधन ।
श्रेयसे राज्यलाभाय वध्वा सह यतव्रत ॥२॥

तथेति च स राजानमुक्त्वा वेदविदां वरः ।
स्वयं वसिष्ठो भगवान् ययौ रामनिवेशनम् ॥३॥

उपवासयितुं वीरं मन्त्रविन्मन्त्रकोविदम् ।
ब्राह्मं रथवरं युक्तमास्थाय सुधृतव्रतः ॥४॥

स रामभवनं प्राप्य पाण्डुराभ्रघनप्रभम् ।
तिस्रः कक्ष्या रथेनैव विवेश मुनिसत्तमः ॥५॥

समागतमृषिं रामस्त्वरन्निव ससंभ्रमम् ।
मानयिष्यन् समानार्हं निश्चक्राम निवेशनात् ॥६॥

अभ्येत्य त्वरमाणोऽथ रथाभ्याशं मनीषिणः ।
ततोऽवतारयामास परिगृह्य रथात् स्वयम् ॥७॥

स चैनं प्रश्रितं दृष्ट्वा संभाष्याभिप्रसाद्य च ।
प्रियार्हं हर्षयन् राममित्युवाच पुरोहितः ॥८॥

प्रसन्नस्ते पिता राम यत्त्वं राज्यमवाप्स्यसि ।
उपवासं भवानद्य करोतु सह सीतया ॥९॥

प्रातस्त्वामभिषेक्ता हि यौवराज्ये नराधिपः ।
पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥१०॥

इत्युक्त्वा स तदा राममुपवासं यतव्रतः ।
मन्त्रवत् कारयामास वैदेह्या सहितं शुचिः ॥११॥

ततो यथावद् रामेण स राज्ञो गुरुरर्चितः ।
अभ्यनुज्ञाप्य काकुत्स्थं ययौ रामनिवेशनात् ॥१२॥

सुहृद्भिस्तत्र रामोऽपि सहासीनः प्रियंवदैः ।
सभाजितो विवेशाथताननुज्ञाप्य सर्वशः ॥१३॥

हृष्टनारीनरयुतं रामवेश्म तदा बभौ ।
यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

स राजभवनप्रख्यात्तस्माद्रामनिवेशनात् ।
निर्गत्य ददृशे मार्गं वसिष्ठो जनसंवृतम् ॥१५॥

वृन्दवृन्दैरयोध्यायां राजमार्गाः समन्ततः ।
बभूवुरभिसंबाधाः कुतूहलजनैर्वृताः ॥१६॥

जनवृन्दोर्मिसंघर्षहर्षस्वनवृतस्तदा ।
बभूव राजमार्गस्य सागरस्येव निःस्वनः ॥१७॥

सिक्तसंमृष्टरथ्या हि तथा च वनमालिनी ।
आसीदयोध्या तदहः समुच्छ्रितगृहध्वजा ॥१८॥

तदा ह्ययोध्यानिलयः सस्त्रीबालाकुलो जन ।
रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षन्नुदयं रवेः ॥१९॥

प्रजालङ्कारभूतं च जनस्यानन्दवर्धनम् ।
उत्सुकोऽभूज्जनो द्रष्टुं तमयोध्यामहोत्सवम् ॥२०॥

एवं तज्जनसंबाधं राजमार्गं पुरोहितः ।
व्यूहन्निव जनौघं तं शनै राजकुलं ययौ ॥२१॥

सिताभ्रशिखरप्रख्यं प्रासादमधिरुह्य च ।
समीयाय नरेन्द्रेण शक्रेणेव बृहस्पतिः ॥२२॥

तमागतमभिप्रेक्ष्य हित्वा राजासनं नृपः ।
पप्रच्छ स्वमतं तस्मै कृतमित्यभिवेदयत् ॥२३॥

तेन चैव तदा तुल्यं सहासीनाः सभासदः ।
आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितम् ॥२४॥

गुरुणा त्वभ्यनुज्ञातो मनुजौघं विसृज्य तम् ।
विवेशान्तःपुरं राजा सिंहो गिरिगुहामिव ॥२५॥

तदग्र्यवेषप्रमदाजनाकुलं महेन्द्रवेश्मप्रतिमं निवेशनम् ।
व्यदीपयंश्चारु विवेश पार्थिवः शशीव तारागणसंकुलं नभः ॥२६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

गते पुरोहिते रामः स्नातो नियतमानसः ।
सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ।।१।।

प्रगृह्य शिरसा पात्रीं हविषो विधिवत्ततः ।
महते दैवतायाऽऽज्यं जुहाव ज्वलितानले ।।२।।

शेषं च हविषस्तस्य प्राश्याऽऽशास्याऽऽत्मनः प्रियम् ।
ध्यायन्नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ।।३।।

वाग्यतः सह वैदेह्या भूत्वा नियतमानसः ।
श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ।।४।।

एकयामावशिष्टायां रात्र्यां प्रतिविबुद्ध्य सः ।
अलंकारविधिं सम्यक् कारयामास वेश्मनः ।।५।।

तत्र शृण्वन् सुखा वाचः सूतमागधबन्दिनाम् ।
पूर्वां सन्ध्यामुपासीनो जजाप सुसमाहितः ।।६।।

तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम् ।
विमलक्षौमसंवीतो वाचयामास स द्विजान् ।।७।।

तेषां पुण्याहघोषोऽथ गम्भीरमधुरस्तथा ।
अयोध्यां पूरयामास तूर्यघोषानुनादितः ।।८।।

कृतोपवासं तु तदा वैदेह्या सह राघवम् ।
अयोध्यानिलयः श्रुत्वा सर्वः प्रमुदितो जनः ।।९।।

ततः पौरजनः सर्वः श्रुत्वा रामाभिषेचनम् ।
प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरीम् ।।१०।।

सिताभ्रशिखराभेषु देवतायतनेषु च ।
चतुष्पथेषु रथ्यासु चैत्येष्वट्टालकेषु च ।।११।।

नानापण्यसमृद्धेषु वणिजामापणेषु च ।
कुटुम्बिनां समृद्धेषु श्रीमत्सु भवनेषु च ।।१२।।

CC-0. Nepal Sanskrit Academy, Kathmandu

सभासु चैव सर्वासु वृक्षेष्वालक्षितेषु च ।
ध्वजाः समुच्छ्रिताः साधु पताकाश्चाभवंस्तथा ।।१३।।

नटनर्तकसङ्घानां गायकानां च गायताम् ।
मनःकर्णसुखा वाचः शुश्राव जनता ततः ।।१४।।

रामाभिषेकयुक्ताश्च कथाश्चक्रुर्मिथो जनाः ।
रामाभिषेके संप्राप्ते चत्वरेषु गृहेषु च ।।१५।।

बाला अपि क्रीडमाना गृहद्वारेषु सङ्घशः ।
रामाभिषवसंयुक्ताश्चक्रुरेव कथा मिथः ।।१६।।

कृतपुष्पोपहारश्च धूपगन्धाधिवासितः ।
राजमार्गः कृतः श्रीमान् पौरैः रामाभिषेचने ।।१७।।

प्रकाशीकरणार्थं च निशाऽऽगमनशङ्कया ।
दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः ।।१८।।

अलंकारं पुरस्यैवं कृत्वा तत्पुरवासिनः ।
आकाङ्क्षमाणा रामस्य यौवराज्याभिषेचनम् ।।१९।।

समेत्य सङ्घशः सर्वे चत्वरेषु सभासु च ।
कथयन्तो मिथस्तत्र प्रशशंसुर्जनाधिपम् ।।२०।।

अहो महात्मा राजाऽयमिक्ष्वाकुकुलनन्दनः ।
ज्ञात्वा वृद्धं स्वमात्मानं रामं राज्येऽभिषेक्ष्यति ।।२१।।

सर्वे ह्यनुगृहीताः स्म यन्नो रामो महीपतिः ।
चिराय भविता गोप्ता दृष्टलोकपरावरः ।।२२।।

अनुद्धतमना विद्वान् धर्मात्मा भ्रातृवत्सलः ।
यथा च भ्रातृषु स्निग्धस्तथास्मास्वपि राघवः ।।२३।।

चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः ।
यत्प्रसादेनाभिषिक्तं रामं द्रक्ष्यामहे वयम् ।।२४।।

एवंविधं कथयतां पौराणां शुश्रुवुः परे ।
दिग्भ्यो विश्रुतवृत्तान्ताः प्राप्ता जानपदा जनाः ।।२५।।

ते तु दिग्भ्यः पुरीं प्राप्ता द्रष्टुं रामाभिषेचनम् ।
CC-0. Nepal Sanskrit Academy, Kathmandu
रामस्य पूरयामासुः पुरीं जानपदा जनाः ।।२६।।

जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निःस्वनः ।
पर्वसूदीर्णवेगस्य सागरस्येव निःस्वनः ।।२७।।

ततस्तदिन्द्रक्षयसंनिभं पुरं दिदृक्षुभिर्जानपदैरुपाहितैः ।
समन्ततः सस्वनमाकुलं बभौ समुद्रयादोभिरिवार्णवोदकम् ।।२८।।

(वाल्मीकिरामायण, अयोध्याकाण्ड)

□

CC-0. Nepal Sanskrit Academy, Kathmandu

सौतानै मामिला

सप्तमः सर्गः

ज्ञातिदासी यतो जाता कैकेय्या तु सहोषिताः ।
प्रासादं चन्द्रसंकाशमारुरोह यदृच्छया ।।१।।

सिक्तराजपथां कृत्स्नां प्रकीर्णकमलोत्पलाम् ।
अयोध्यां मन्थरा तस्मात्प्रासादादन्ववैक्षत ।।२।।

पताकाभिर्वराह्राभिर्ध्वजैश्च समलंकृताम् ।
सिक्तां चन्दनतोयैश्च शिरःस्नातजनैर्युताम् ।।३।।

माल्यमोदकहस्तैश्च द्विजेन्द्रैरभिनादिताम् ।
शुक्लदेवगृहद्वारां सर्ववादित्रनादिताम् ।।४।।

संप्रहृष्टजनाकीर्णां ब्रह्मघोषनिनादिताम् ।
प्रहृष्टवरहस्त्यश्वां संप्रणर्दितगोवृषाम् ।।५।।

हृष्टप्रमुदितैः पौरैरुच्छ्रितध्वजमालिनीम् ।
अयोध्यां मन्थरा दृष्ट्वा परं विस्मयमागता ।।६।।

सा हर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीम् ।
अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मन्थरा ।।७।।

उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती ।
राममाता धनं किं नु जनेभ्यः संप्रयच्छति ।।८।।

अतिमात्रं प्रहर्षः किं जनस्यास्य च शंस मे ।
कारयिष्यति किं वापि संप्रहृष्टो महीपतिः ।।९।।

विदीर्यमाणा हर्षेण धात्री तु परया मुदा ।
आचचक्षेऽथ कुब्जायै भूयसीं राघवे श्रियम् ।।१०।।

श्वः पुष्येण जितक्रोधं यौवराज्येन चानघम् ।
राजा दशरथो राममभिषेक्ता हि राघवम् ।।११।।

CC-0 Nepal Sanskrit Academy, Kathmandu

धात्र्यास्तु वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता ।
कैलासशिखराकारात् प्रासादादवरोहत ।।१२।।

सा दह्यमाना क्रोधेन मन्थरा पापदर्शिनी ।
शयानामेव कैकेयीमिदं वचनमब्रवीत् ।।१३।।

उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ।
उपप्लुतमघौघेन नात्मानमवबुद्धचसे ।।१४।।

अनिष्टे सुभगाकारे सौभाग्येन विकत्थसे ।
चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे ।।१५।।

एवमुक्ता तु कैकेयी रुष्टया परुषं वचः ।
कुब्जया पापदर्शिन्या विषादमगमत् परम् ।।१६।।

कैकेयी त्वब्रवीत् कुब्जां कच्चित् क्षेमं न मन्थरे ।
विषण्णवदनां हि त्वां लक्षये भृशदुःखिताम् ।।१७।।

मन्थरा तु वचः श्रुत्वा कैकेय्या मधुराक्षरम् ।
उवाच क्रोधसंयुक्ता वाक्यं वाक्यविशारदा ।।१८।।

सा विषण्णतरा भूत्वा कुब्जा तस्यां हितैषिणी ।
विषादयन्ती प्रोवाच भेदयन्ती च राघवम् ।।१९।।

अक्षयं सुमहद्देवि प्रवृत्तं त्वद्विनाशनम् ।
रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ।।२०।।

साऽस्म्यगाधे भये मग्ना दुःखशोकसमन्विता ।
दह्यमानाऽनलेनेव त्वद्धितार्थमिहागता ।।२१।।

तव दुःखेन कैकेयि मम दुःखं महद्भवेत् ।
त्वद्वृद्धौ मम वृद्धिश्च भवेदिह न संशयः ।।२२।।

नराधिपकुले जाता महिषी त्वं महीपतेः ।
उग्रत्वं राजधर्माणां कथं देवि न बुद्धचसे ।।२३।।

धर्मवादी शठो भर्ता श्लक्ष्णवादी च दारुणः ।
शुद्धभावेन जानीषे तेनैवमतिसन्धिता ।।२४।।

CC-0. Nepal Sanskrit Academy, Kathmandu

उपस्थितः प्रयुञ्जानस्त्वयि सान्त्वमनर्थकम् ।
अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ।।२५।।

अपवाह्य तु दुष्टात्मा भरतं तव बन्धुषु ।
काल्ये स्थापयिता रामं राज्ये निहतकण्टके ।।२६।।

शत्रुः पतिप्रवादेन मात्रेऽवहितकाम्यया ।
आशीविष इवाङ्केन बाले परिधृतस्त्वया ।।२७।।

यथा हि कुर्याच्छत्रुर्वा सर्पो वा प्रत्युपेक्षितः ।
राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ।।२८।।

पापेनानृतसान्त्वेन बाले नित्यं सुखोचिता ।
रामं स्थापयता राज्ये सानुबन्धा हता ह्यसि ।।२९।।

सा प्राप्तकालं कैकेयि क्षिप्रं कुरु हितं तव ।
त्रायस्व पुत्रमात्मानं मां च विस्मयदर्शने ।।३०।।

मन्थराया वचः श्रुत्वा शयनात् सा शुभानना ।
उत्तस्थौ हर्षसंपूर्णा चन्द्रलेखेव शारदी ।।३१।।

अतीव सा तु सन्तुष्टा कैकेयी विस्मयान्विता ।
दिव्यमाभरणं तस्यै कुब्जायै प्रददौ शुभम् ।।३२।।

दत्वा त्वाभरणं तस्यै कुब्जायै प्रमदोत्तमा ।
कैकेयी मन्थरां हृष्टा पुनरेवाब्रवीदिदम् ।।३३।।

इदं तु मन्थरे मह्यमाख्यातं परमं प्रियम् ।
एतन्मे प्रियमाख्यातं किं वा भूयः करोमि ते ।।३४।।

रामे वा भरते वाऽहं विशेषं नोपलक्षये ।
तस्मात् तुष्टास्मि यद्राजा रामं राज्येऽभिषेक्ष्यति ।।३५।।

न मे परं किंचिदितो वरं पुनः प्रियं प्रियार्हे सुवचं वचोऽमृतम् ।
तथा ह्यवोचस्त्वमतः प्रियोत्तरं वरं परं ते प्रददामि तं वृणु ।।३६।।

CC-0. Nepal Sanskrit Academy, Kathmandu

मन्थरा त्वभ्यसूय्यैनामुत्सृज्याऽभरणं हि तत् ।
उवाचेदं ततो वाक्यं कोपदुःखसमन्विता ॥१॥

हर्षं किमर्थमस्थाने कृतवत्यसि बालिशे ।
शोकसागरमध्यस्थं नात्मानमवबुद्धचसे ॥२॥

मनसा प्रसहामि त्वां देवि दुःखार्दिता सती ।
यच्छोचितव्ये हृष्टासि प्राप्य त्वं व्यसनं महत् ॥३॥

शोचामि दुर्मतित्वं ते का हि प्राज्ञा प्रहर्षयेत् ।
अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागताम् ॥४॥

भरतादेव रामस्य राज्यसाधारणाद्भयम् ।
तद्विचिन्त्य विषण्णास्मि भयं भीताद्धि जायते ॥५॥

लक्ष्मणो हि महाबाहू रामं सर्वात्मना गतः ।
शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा ॥६॥

प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि ।
राज्यक्रमो विसृष्टस्तु तयोस्तावद् यवीयसोः ॥७॥

विदुषः क्षत्रचारित्रे प्राज्ञस्य प्राप्तकारिणः ।
भयात् प्रवेपे रामस्य चिन्तयन्ती तवात्मजम् ॥८॥

सुभगा किल कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते ।
यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः ॥९॥

प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषम् ।
उपस्थास्यसि कौसल्यां दासीवत् त्वं कृताञ्जलिः ॥१०॥

एवं च त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि ।
पुत्रश्च तव रामस्य प्रेष्यत्वं हि गमिष्यति ॥११॥

हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः ।
अप्रहृष्टा भविष्यन्ति स्नुषास्ते भरतक्षये ॥१२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

तां दृष्ट्वा परमप्रीतां ब्रुवन्तीं मन्थरां ततः ।
रामस्यैव गुणान् देवी कैकेयी प्रशशंस ह ।।१३।।

धर्मज्ञो गुणवान् दान्तः कृतज्ञः सत्यवाञ्छुचिः ।
रामो राजसुतो ज्येष्ठो यौवराज्यमतोऽर्हति ।।१४।।

भ्रातॄन् भृत्यांश्च दीर्घायुः पितृवत् पालयिष्यति ।
संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनम् ।।१५।।

भरतश्चापि रामस्य ध्रुवं वर्षशतात्परम् ।
पितृपैतामहं राज्यमवाप्स्यति नरर्षभः ।।१६।।

सा त्वमभ्युदये प्राप्ते दह्यमानेव मन्थरे ।
भविष्यति च कल्याणे किमिदं परितप्यसे ।।१७।।

यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौसल्यातोऽतिरिक्तं च मम शुश्रूषते बहु ।।१८।।

राज्यं यदि हि रामस्य भरतस्यापि तत्तदा ।
मन्यते हि यथात्मानं तथा भ्रातॄंस्तु राघवः ।।१९।।

कैकेय्या वचनं श्रुत्वा मन्थरा भृशदुःखिता ।
दीर्घमुष्णं विनिःश्वस्य कैकेयीमिदमब्रवीत् ।।२०।।

अनर्थदर्शिनी मौर्ख्यान्नात्मानमवबुद्ध्यसे ।
शोकव्यसनविस्तीर्णे मज्जन्ती दुःखसागरे ।।२१।।

भविता राघवो राजा राघवस्य च यः सुतः ।
राजवंशात्तु भरतः कैकेयि परिहास्यते ।।२२।।

नहि राज्ञः सुताः सर्वे राज्ये तिष्ठन्ति भामिनि ।
स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ।।२३।।

तस्माज्ज्येष्ठे हि कैकेयि राज्यतन्त्राणि पार्थिवाः ।
स्थापयन्त्यनवद्याङ्गि गुणवत्स्वितरेष्वपि ।।२४।।

असावत्यन्तनिर्भग्नस्तव पुत्रो भविष्यति ।
अनाथवत् सुखेभ्यश्च राजवंशाच्च वत्सले ।।२५।।

CC-0. Nepal Sanskrit Academy, Kathmandu

साऽहं त्वदर्थे संप्राप्ता त्वं तु मां नावबुद्ध्यसे ।
सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमर्हसि ।।२६।।

ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकम् ।
देशान्तरं नाययिता लोकान्तरमथापि वा ।।२७।।

बाल एव तु मातुल्यं भरतो नायितस्त्वया ।
संनिकर्षाच्च सौहार्दं जायते स्थावरेष्विव ।।२८।।

भरतानुवशात् सोऽपि शत्रुघ्नस्तत्समं गतः ।
लक्ष्मणो हि यथा रामं तथाऽयं भरतं गतः ।।२९।।

श्रूयते हि द्रुमः कश्चिच्छेत्तव्यो वनजीवनैः ।
संनिकर्षादिषीकाभिर्मोचितः परमाद्भयात् ।।३०।।

गोप्ता हि रामं सौमित्रिर्लक्ष्मणं चापि राघवः ।
अश्विनोरिव सौभ्रात्रं तयोर्लोकेषु विश्रुतम् ।।३१।।

तस्मान्न लक्ष्मणे रामः पापं किंचित्करिष्यति ।
रामस्तु भरते पापं कुर्यादेव न संशयः ।।३२।।

तस्माद्राजगृहादेव वनं गच्छतु राघवः ।
एतद्धि रोचते मह्यं भृशं चापि हितं तव ।।३३।।

एवं ते ज्ञातिपक्षस्य श्रेयश्चैव भविष्यति ।
यदि चेद्भरतो धर्मात् पित्र्यं राज्यमवाप्स्यति ।।३४।।

स ते सुखोचितो बालो रामस्य सहजो रिपुः ।
समृद्धार्थस्य नष्टार्थो जीविष्यति कथं वशे ।।३५।।

अभिद्रुतमिवारण्ये सिंहेन गजयूथपम् ।
प्रच्छाद्यमानं रामेण भरतं त्रातुमर्हसि ।।३६।।

दर्पान्निराकृता पूर्वं त्वया सौभाग्यवत्तया ।
राममाता सपत्नी ते कथं वैरं न यापयेत् ।।३७।।

यदा च रामः पृथिवीमवाप्स्यते प्रभूतरत्नाकरशैलसंयुताम् ।
तदा गमिष्यस्यशुभं पराभवं सहैव दीना भरतेन भामिनि ।।३८।।

CC-0. Nepal Sanskrit Academy, Kathmandu

यदा हि रामः पृथिवीमवाप्स्यते ध्रुवं प्रनष्टो भरतो भविष्यति ।
अतो हि संचिन्तय राज्यमात्मजे परस्य चैवास्य विवासकारणम् ३६॥

नवमः सर्गः

एवमुक्ता तु कैकेयी क्रोधेन ज्वलिताऽऽनना ।
दीर्घमुष्णं विनिःश्वस्य मन्थरामिदमब्रवीत् ॥१॥

अद्य राममितः क्षिप्रं वनं प्रस्थापयाम्यहम् ।
यौवराज्येन भरतं क्षिप्रमद्याभिषेचये ॥२॥

इदं त्विदानीं संपश्य केनोपायेन साधये ।
भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥३॥

एवमुक्ता तु सा देव्या मन्थरा पापदर्शिनी ।
रामार्थमुपहिंसन्ती कैकेयीमिदमब्रवीत् ॥४॥

हन्तेदानीं प्रपश्य त्वं कैकेयि श्रूयतां वचः ।
यथा ते भरतो राज्यं पुत्रः प्राप्स्यति केवलम् ॥५॥

किं न स्मरसि कैकेयि स्मरन्ती वा निगूहसे ।
यदुच्यमानमात्मार्थं मत्तस्त्वं श्रोतुमिच्छसि ॥६॥

मयोच्यमानं यदि ते श्रोतुं छन्दो विलासिनि ।
श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम् ॥७॥

श्रुत्वैवं वचनं तस्या मन्थरायास्तु कैकयी ।
किंचिदुत्थाय शयनात् स्वास्तीर्णादिदमब्रवीत् ॥८॥

कथयस्व ममोपायं केनोपायेन मन्थरे ।
भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥९॥

एवमुक्ता तदा देव्या मन्थरा पापदर्शिनी ।
रामार्थमुपहिंसन्ती कैकेयीमिदमब्रवीत् ॥१०॥

पुरा देवासुरे युद्धे सह राजर्षिभिः पतिः ।
आगच्छत् त्वामुपादाय देवराजस्य साह्यकृत् ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

दिशमास्थाय कैकेयि दक्षिणां दण्डकान् प्रति ।
वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः ॥१२॥

स शम्बर इति ख्यातः शतमायो महासुरः ।
ददौ शक्रस्य सङ्ग्रामं देवसङ्घैरनिन्दितः ॥१३॥

तस्मिन् महति सङ्ग्रामे पुरुषान् क्षतविक्षतान् ।
रात्रौ प्रसुप्तान् घ्नन्ति स्म तरसापास्य राक्षसाः ॥१४॥

तत्राऽकरोन्महायुद्धं राजा दशरथस्तदा ।
असुरैश्च महाबाहुः शस्त्रैश्च शकलीकृतः ॥१५॥

अपवाह्य त्वया देवि सङ्ग्रामान्नष्टचेतनः ।
तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया ॥१६॥

तुष्टेन तेन दत्तौ ते द्वौ वरौ शुभदर्शने ।
स त्वयोक्तः पतिर्देवि यदिच्छेयं तदा वरम् ॥१७॥

गृह्णीयां तु तदा भर्तस्तथेत्युक्तं महात्मना ।
अनभिज्ञा ह्यहं देवि त्वयैव कथितं पुरा ॥१८॥

कथैषा तव तु स्नेहान्मनसा धार्यते मया ।
रामाभिषेकसंभारान्निगृह्य विनिवर्तय ॥१९॥

तौ च याचस्व भर्तारं भरतस्याभिषेचनम् ।
प्रव्राजनं च रामस्य वर्षाणि च चतुर्दश ॥२०॥

चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् ।
प्रजाभावगतस्नेहः स्थिरः पुत्रो भविष्यति ॥२१॥

क्रोधागारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते ।
शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ॥२२॥

मा स्मैनं प्रत्युदीक्षेथा मा चैनमभिभाषथाः ।
रुदन्ती पार्थिवं दृष्ट्वा जगत्यां शोकलालसा ॥२३॥

दयिता त्वं सदा भर्तुरत्र मे नास्ति संशयः ।
त्वत्कृते च महाराजो विशेदपि हुताशनम् ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

न त्वां क्रोधयितुं शक्तो न क्रुद्धां प्रत्युदीक्षितुम् ।
तव प्रियार्थं राजा तु प्राणानपि परित्यजेत् ।।२५।।

न ह्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः ।
मन्दस्वभावे बुद्ध्यस्व सौभाग्यबलमात्मनः ।।२६।।

मणिमुक्तासुवर्णानि रत्नानि विविधानि च ।
दद्याद् दशरथो राजा मा स्म तेषु मनः कृथाः ।।२७।।

यौ तौ देवासुरे युद्धे वरौ दशरथो ददौ ।
तौ स्मारय महाभागे सोऽर्थो न त्वा क्रमेदति ।।२८।।

यदा तु ते वरं दद्यात् स्वयमुत्थाप्य राघवः ।
व्यवस्थाप्य महाराजं त्वमिमं वृणुया वरम् ।।२९।।

रामप्रव्रजनं दूरं नव वर्षाणि पञ्च च ।
भरतः क्रियतां राजा पृथिव्यां पार्थिवर्षभ ।।३०।

चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् ।
रूढश्च कृतमूलश्च शेषं स्थास्यति ते सुतः ।।३१।।

रामप्रव्राजनं चैव देवि याचस्व तं वरम् ।
एवं सेत्स्यन्ति पुत्रस्य सर्वार्थास्तव कामिनि ।।३२।।

एवं प्रव्राजितश्चैव रामोऽरामो भविष्यति ।
भरतश्च गतामित्रस्तव राजा भविष्यति ।।३३।।

येन कालेन रामश्च वनात् प्रत्यागमिष्यति ।
अन्तर्बहिश्च पुत्रस्ते कृतमूलो भविष्यति ।।३४।।

संगृहीतमनुष्यश्च सुहृद्भिः साकमात्मवान् ।
प्राप्तकालं नु मन्येऽहं राजानं वीतसाध्वसा ।।३५।।

रामाभिषेकसंकल्पान्निगृह्य विनिवर्तय ।
अनर्थमर्थरूपेण ग्राहिता सा ततस्तया ।।३६।।

हृष्टा प्रतीता कैकेयी मन्थरामिदमब्रवीत् ।
सा हि वाक्येन कुब्जायाः किशोरीवोत्पथं गता ।।३७।।

CC-0. Nepal Sanskrit Academy, Kathmandu

कैकेयी विस्मयं प्राप्य परं परमदर्शना ।
प्रज्ञां ते नावजानामि श्रेष्ठे श्रेष्ठाभिधायिनि ।।३८।।

पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये ।
त्वमेव तु ममार्थेषु नित्ययुक्ता हितैषिणी ।।३९।।

नाहं समवबुद्ध्येयं कुब्जे राज्ञश्चिकीर्षितम् ।
सन्ति दुःसंस्थिताः कुब्जे वक्राः परमपापिकाः ।।४०।।

त्वं पद्ममिव वातेन संनता प्रियदर्शना ।
उरस्तेऽभिनिविष्टं वै यावत् स्कन्धात् समुन्नतम् ।।४१।।

अधस्ताच्चोदरं शान्तं सुनाभमिव लज्जितम् ।
प्रतिपूर्णं च जघनं सुपीनौ च पयोधरौ ।।४२।।

विमलेन्दुसमं वक्त्रमहो राजसि मन्थरे ।
जघनं तव निर्मृष्टं रशनादामभूषितम् ।।४३।।

जङ्घे भृशमुपन्यस्ते पादौ च व्यायतावुभौ ।
त्वमायताभ्यां सक्थिभ्यां मन्थरे क्षौमवासिनि ।।४४।।

अग्रतो मम गच्छन्ती राजसेऽतीव शोभने ।
आसन्याः शम्बरे मायाः सहस्रमसुराधिपे ।।४५।।

हृदये ते निविष्टास्ता भूयश्चान्याः सहस्रशः ।
तदेव स्थगु यद्दीर्घं रथघोणमिवायतम् ।।४६।।

मतयः क्षत्रविद्याश्च मायाश्चात्र वसन्ति ते ।
अत्र तेऽहं प्रमोक्ष्यामि मालां कुब्जे हिरण्मयीम् ।।४७।।

अभिषिक्ते च भरते राघवे च वनं गते ।
जात्येन च सुवर्णेन सुनिष्टप्तेन सुन्दरि ।।४८।।

लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु ।
मुखे च तिलकं चित्रं जातरूपमयं शुभम् ।।४९।।

कारयिष्यामि ते कुब्जे शुभान्याभरणानि च ।
परिधाय शुभे वस्त्रे देवतेव चरिष्यसि ।।५०।।

CC-0. Nepal Sanskrit Academy, Kathmandu

चन्द्रमाह्वयमानेन मुखेनाप्रतिमानना ।
गमिष्यसि गतिं मुख्यां गर्वयन्ती द्विषज्जने ॥५१॥

तवापि कुब्जाः कुब्जायाः सर्वाभरणभूषिताः ।
पादौ परिचरिष्यन्ति यथैव त्वं सदा मम ॥५२॥

इति प्रशस्यमाना सा कैकेयीमिदमब्रवीत् ।
शयानां शयने शुभ्रे वेद्यामग्निशिखामिव ॥५३॥

गतोदके सेतुबन्धो न कल्याणि विधीयते ।
उत्तिष्ठ कुरु कल्याणं राजानमनुदर्शय ॥५४॥

तथा प्रोत्साहिता देवी गत्वा मन्थरया सह ।
क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥५५॥

अनेकशतसाहस्रं मुक्ताहारं वराङ्गना ।
अवमुच्य वरार्हाणि शुभान्याभरणानि च ॥५६॥

तदा हेमोपमा तत्र कुब्जावाक्यवशंगता ।
संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥५७॥

इह वा मां मृतां कुब्जे नृपायाऽवेदयिष्यसि ।
वनं तु राघवे प्राप्ते भरतः प्राप्स्यते क्षितिम् ॥५८॥

सुवर्णेन न मे ह्यर्थो न रत्नैर्न च भोजनैः ।
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥५९॥

अथो पुनस्तां महिषीं महीक्षितो वचोभिरत्यर्थमहापराक्रमैः ।
उवाच कुब्जा भरतस्य मातरं हितं वचो राममुपेत्य चाहितम् ॥६०॥

प्रपत्स्यते राज्यमिदं हि राघवो यदि ध्रुवं त्वं ससुता च तप्स्यसे ।
ततो हि कल्याणि यतस्व तत्तथा यथा सुतस्ते भरतोऽभिषेक्ष्यते ॥६१॥

तथाऽतिविद्धा महिषीति कुब्जया समाहता वागिषुभिर्मुहुर्मुहुः ।
विधाय हस्तौ हृदयेऽतिविस्मिता शशंस कुब्जां कुपिता पुनः पुनः ॥६२॥

यमस्य वा मां विषयं गतामितो निशम्य कुब्जे प्रतिवेदयिष्यसि ।
वनं गते वा सुचिराय राघवे समृद्धकामो भरतो भविष्यति ॥६३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अहं हि नैवाऽस्तरणानि न स्रजो न चन्दनं नाञ्जनपानभोजनम् ।
न किंचिदिच्छामि न चेह जीवनं न चेदितो गच्छति राघवो वनम् ६४।।

अथैवमुक्त्वा वचनं सुदारुणं निधाय सर्वाभरणानि भामिनी ।
असंस्कृतामास्तरणेन मेदिनीं तदाऽधिशिश्ये पतितेव किन्नरी ।।६५।।

उदीर्णसंरम्भतमोवृताऽनना तदाऽवमुक्तोत्तममाल्यभूषणा ।
नरेन्द्रपत्नी विमना बभूव सा तमोवृता द्यौरिव मग्नतारका ।।६६।।

दशमः सर्गः

विदर्शिता यदा देवी कुब्जया पापया भृशम् ।
तदा शेते स्म सा भूमौ दिग्धविद्धेव किन्नरी ।।१।।

निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी ।
मन्थरायै शनैः सर्वमाचचक्षे विचक्षणा ।।२।।

सा दीना निश्चयं कृत्वा मन्थरावाक्यमोहिता ।
नागकन्येव निःश्वस्य दीर्घमुष्णं च भामिनी ।।३।।

मुहूर्तं चिन्तयामास मार्गमात्मसुखावहम् ।
सा सुहृच्चार्थकामा च तं निशम्य विनिश्चयम् ।।४।।

बभूव परमप्रीता सिद्धिं प्राप्येव मन्थरा ।
अथ सा रुषिता देवी सम्यक् कृत्वा विनिश्चयम् ।।५।।

संविवेशाऽबला भूमौ निवेश्य भ्रुकुटिं मुखे ।
ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च ।।६।।

अपविद्धानि कैकेय्या तानि भूमिं प्रपेदिरे ।
तया तान्यपविद्धानि माल्यान्याभरणानि च ।।७।।

अशोभयन्त वसुधां नक्षत्राणि यथा नभः ।
क्रोधागारे च पतिता सा बभौ मलिनाऽम्बरा ।।८।।

एकवेणीं दृढां बद्ध्वा गतसत्त्वेव किन्नरी ।
आज्ञाप्य तु महाराजो राघवस्याभिषेचनम् ।।९।।

CC-0. Nepal Sanskrit Academy, Kathmandu

उपस्थानमनुज्ञाप्य प्रविवेश निवेशनम् ।
अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ॥१०॥

प्रियार्हां प्रियमाख्यातुं विवेशान्तःपुरं वशी ।
स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः ॥११॥

पाण्डुराभ्रमिवाकाशं राहुयुक्तं निशाकरः ।
शुकबर्हिसमायुक्तं क्रौञ्चहंसरुतायुतम् ॥१२॥

वादित्ररवसंघुष्टं कुब्जावामनिकायुतम् ।
लतागृहैश्चित्रगृहैश्चम्पकाशोकशोभितैः ॥१३॥

दान्तराजतसौवर्णवेदिकाभिः समायुतम् ।
नित्यपुष्पफलैर्वृक्षैर्वापीभिरुपशोभितम् ॥१४॥

दान्तराजतसौवर्णैः संवृतं परमासनैः ।
विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ॥१५॥

उपपन्नं महार्हैश्च भूषणैस्त्रिदिवोपमम् ।
स प्रविश्य महाराजः स्वमन्तःपुरमृद्धिमत् ॥१६॥

न ददर्श स्त्रियं राजा कैकेयीं शयनोत्तमे ।
स कामबलसंयुक्तो रत्यर्थी मनुजाधिपः ॥१७॥

अपश्यन् दयितां भार्यां पप्रच्छ विषसाद च ।
नहि तस्य पुरा देवी तां वेलामत्यवर्तत ॥१८॥

न च राजा गृहं शून्यं प्रविवेश कदाचन ।
ततो गृहगतो राजा कैकेयीं पर्यपृच्छत ॥१९॥

यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डिताम् ।
प्रतिहारी त्वथोवाच संत्रस्ता तु कृताञ्जलिः ॥२०॥

देव देवी भृशं क्रुद्धा क्रोधागारमभिद्रुता ।
प्रतीहार्या वचः श्रुत्वा राजा परमदुर्मनाः ॥२१॥

विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रियः ।
तत्र तां पतितां भूमौ शयानामतथोचिताम् ॥२२॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः ।
स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् ॥२३॥

अपापः पापसंकल्पां ददर्श धरणीतले ।
लतामिव विनिष्कृत्तां पतितां देवतामिव ॥२४॥

किन्नरीमिव निर्धूतां च्युतामप्सरसं यथा ।
मायामिव परिभ्रष्टां हरिणीमिव संयताम् ॥२५॥

करेणुमिव दिग्धेन विद्धां मृगयुना वने ।
महागज इवारण्ये स्नेहात् परमदुःखिताम् ॥२६॥

परिमृज्य च पाणिभ्यामभिसंत्रस्तचेतनः ।
कामी कमलपत्राक्षीमुवाच वनितामिदम् ॥२७॥

न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम् ।
देवि केनाऽभियुक्ताऽसि केन वाऽसि विमानिता ॥२८॥

यदिदं मम दुःखाय शेषे कल्याणि पांसुषु ।
भूमौ शेषे किमर्थं त्वं मयि कल्याणचेतसि ॥२९॥

भूतोपहतचित्तेव मम चित्तप्रमाथिनि ।
सन्ति मे कुशला वैद्यास्त्वभितुष्टाश्च सर्वशः ॥३०॥

सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि ।
कस्य वाऽपि प्रियं कार्यं केन वा विप्रियं कृतम् ॥३१॥

कः प्रियं लभतामद्य को वा सुमहदप्रियम् ।
मा रौत्सीर्मा च कार्षीस्त्वं देवि संपरिशोषणम् ॥३२॥

अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम् ।
दरिद्रः को भवेदाढ्यो द्रव्यवान् वाऽप्यकिञ्चनः ॥३३॥

अहं च हि मदीयाश्च सर्वे तव वशानुगाः ।
न ते कञ्चिदभिप्रायं व्याहन्तुमहमुत्सहे ॥३४॥

आत्मनो जीवितेनापि ब्रूहि यन्मनसि स्थितम् ।
बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि ॥३५॥

CC-0. Nepal Sanskrit Academy, Kathmandu

करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ।
यावदावर्तते चक्रं तावती मे वसुन्धरा ॥३६॥

द्राविडाः सिन्धुसौवीराः सौराष्ट्रा दक्षिणापथाः ।
वङ्गाङ्गमगधा मत्स्याः समृद्धाः काशिकोसलाः ॥३७॥

तत्र जातं बहु द्रव्यं धनधान्यमजाविकम् ।
ततो वृणीष्व कैकेयि यद् यत् त्वं मनसेच्छसि ॥३८॥

किमायासेन ते भीरु उत्तिष्ठोत्तिष्ठ शोभने ।
तत् त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतम् ।
तत् ते व्यपनयिष्यामि नीहारमिव रश्मिवान् ॥३९॥

तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम् ।
परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥४०॥

एकादशः सर्गः

तं मन्मथशरैर्विद्धं कामवेगवशानुगम् ।
उवाच पृथिवीपालं कैकेयी दारुणं वचः ॥१॥

नास्मि विप्रकृता देव केनचिन्नावमानिता ।
अभिप्रायस्तु मे कश्चित् तमिच्छामि त्वया कृतम् ॥२॥

प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ।
अथ ते व्याहरिष्यामि यथाऽभिप्रार्थितं मया ॥३॥

तामुवाच महाराजः कैकेयीमीषदुत्स्मयः ।
कामी हस्तेन संगृह्य मूर्धजेषु भुवि स्थिताम् ॥४॥

अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ।
मनुजो मनुजव्याघ्राद् रामादन्यो न विद्यते ॥५॥

तेनाजय्येन मुख्येन राघवेण महात्मना ।
शपे ते जीवनार्हेण ब्रूहि यन्मनसेप्सितम् ॥६॥

यं मुहूर्तमपश्यंस्तु न जीवे तमहं ध्रुवम् ।
तेन रामेण कैकेयि शपे ते वचनक्रियाम् ॥७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

आत्मना चात्मजैश्चान्यैर्वृणे यं मनुजर्षभम् ।
तेन रामेण कैकेयि शपे ते वचनक्रियाम् ॥८॥

भद्रे हृदयमप्येतदनुमृश्योद्धरस्व मे ।
एतत् समीक्ष्य कैकेयि ब्रूहि यत् साधु मन्यसे ॥९॥

बलमात्मनि पश्यन्ती न विशङ्कितुमर्हसि ।
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥१०॥

सा तदर्थमना देवी तमभिप्रायमागतम् ।
निर्माध्यस्थ्याच्च हर्षाच्च बभाषे दुर्वचं वचः ॥११॥

तेन वाक्येन संहृष्टा तमभिप्रायमात्मनः ।
व्याजहार महाघोरमभ्यागतमिवान्तकम् ॥१२॥

यथाक्रमेण शपसे वरं मम ददासि च ।
तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः सेन्द्रपुरोगमाः ॥१३॥

चन्द्रादित्यौ नभश्चैव ग्रहा रात्र्यहनी दिशः ।
जगच्च पृथिवी चेयं सगन्धर्वाः सराक्षसाः ॥१४॥

निशाचराणि भूतानि गृहेषु गृहदेवताः ।
यानि चान्यानि भूतानि जानीयुर्भाषितं तव ॥१५॥

सत्यसन्धो महातेजा धर्मज्ञः सत्यवाक् शुचिः ।
वरं मम ददात्येष सर्वे शृण्वन्तु दैवताः ॥१६॥

इति देवी महेष्वासं परिगृह्याभिशस्य च ।
ततः परमुवाचेदं वरदं काममोहितम् ॥१७॥

स्मर राजन् पुरावृत्तं तस्मिन् देवासुरे रणे ।
तत्र त्वां च्यावयच्छत्रुस्तव जीवितमन्तरा ॥१८॥

तत्र चापि मया देव यत् त्वं समभिरक्षितः ।
जाग्रत्या यतमानायास्ततो मे प्रददौ वरौ ॥१९॥

तौ दत्तौ च वरौ देव निक्षेपौ मृगयाम्यहम् ।
तवैव पृथिवीपाल सकाशे रघुनन्दन ॥२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

तत्प्रतिश्रुत्य धर्मेण न चेद् दास्यसि मे वरम् ।
अद्यैव हि प्रहास्यामि जीवितं त्वद्विमानिता ॥२१॥

वाङ्मात्रेण तदा राजा कैकेय्या स्ववशं कृतः ।
प्रचस्कन्द विनाशाय पाशं मृग इवात्मनः ॥२२॥

ततः परमुवाचेदं वरदं काममोहितम् ।
वरौ देयौ त्वया देव तदा दत्तौ महीपते ॥२३॥

तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः ।
अभिषेकसमारम्भो राघवस्योपकल्पितः ॥२४॥

अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम् ।
यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ॥२५॥

तदा देवासुरे युद्धे तस्य कालोऽयमागतः ।
नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ॥२६॥

चीराजिनधरो धीरो रामो भवतु तापसः ।
भरतो भजतामद्य यौवराज्यमकण्टकम् ॥२७॥

एष मे परमः कामो दत्तमेव वरं वृणे ।
अद्य चैव हि पश्येयं प्रयान्तं राघवं वने ॥२८॥

स राजराजो भवसत्यसंगरः कुलं च शीलं च हि जन्म रक्ष च ।
परत्र वासे हि वदन्त्यनुत्तमं तपोधनाः सत्यवचो हितं नृणाम् ॥२९॥

द्वादशः सर्गः

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ।
चिन्तामभिसमापेदे मुहूर्तं प्रतताप च ॥१॥

किं नु मेऽयं दिवास्वप्नश्चित्तमोहोऽपि वा मम ।
अनुभूतोपसर्गो वा मनसो वाऽप्युपद्रवः ॥२॥

इति संचिन्त्य तद्राजा नाध्यगच्छत्तदा सुखम् ।
प्रतिलभ्य ततः संज्ञां कैकेयीवाक्यतापितः ॥३॥

CC-0. Nepal Sanskrit Academy, Kathmandu.

व्यथितो विक्लवश्चैव व्याघ्रीं दृष्ट्वा यथा मृगः ।
असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ॥४॥

मण्डले पन्नगो रुद्धो मन्त्रैरिव महाविषः ।
अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ॥५॥

मोहमापेदिवान् भूयः शोकोपहतचेतनः ।
चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः ॥६॥

कैकेयीमब्रवीत् क्रुद्धो निर्दहन्निव तेजसा ।
नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ॥७॥

किं कृतं तव रामेण पापे पापं मयाऽपि वा ।
सदा ते जननीतुल्यां वृत्तिं वहति राघवः ॥८॥

तस्यैवं त्वमनर्थाय किंनिमित्तमिहोद्यता ।
त्वं मयाऽत्मविनाशाय भवनं स्वं निवेशिता ॥९॥

अविज्ञानान्नृपसुता व्याला तीक्ष्णविषा यथा ।
जीवलोको यदा सर्वो रामस्याऽह गुणस्तवम् ॥१०॥

अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ।
कौसल्यां च सुमित्रां च त्यजेयमपि वा श्रियम् ॥११॥

जीवितं चात्मना रामं न त्वेव पितृवत्सलम् ।
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ॥१२॥

अपश्यतस्तु मे रामं नष्टं भवति चेतनम् ।
तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ॥१३॥

न तु रामं विना देहे तिष्ठेत् तु मम जीवितम् ।
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ॥१४॥

अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ।
किमर्थं चिन्तितं पापे त्वया परमदारुणम् ॥१५॥

अथ जिज्ञाससे मां त्वं भरतस्य प्रियाप्रिये ।
अस्तु यत् तत् त्वया पूर्वं व्याहृतं राघवं प्रति ॥१६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

स मे ज्येष्ठसुतः श्रीमान् धर्मज्येष्ठ इतीव मे ।
तत् त्वया प्रियवादिन्या सेवार्थं कथितं भवेत् ॥१७॥

तच्छ्रुत्वा शोकसन्तप्ता सन्तापयसि मां भृशम् ।
आविष्टाऽसि गृहे शून्ये सा त्वं परवशंगता ॥१८॥

इक्ष्वाकूणां कुले देवि संप्राप्तः सुमहानयम् ।
अनयो नयसंपन्ने यत्र ते विकृता मतिः ॥१९॥

नहि किञ्चिदयुक्तं वा विप्रियं वा पुरा मम ।
अकरोस्त्वं विशालाक्षि तेन न श्रद्दधामि ते ॥२०॥

ननु ते राघवस्तुल्यो भरतेन महात्मना ।
बहुशो हि स्म बाले त्वं कथाः कथयसे मम ॥२१॥

तस्य धर्मात्मनो देवि वने वासं यशस्विनः ।
कथं रोचयसे भीरु नव वर्षाणि पञ्च च ॥२२॥

अत्यन्तसुकुमारस्य तस्य धर्मे कृतात्मनः ।
कथं रोचयसे वासमरण्ये भृशदारुणे ॥२३॥

रोचयस्यभिरामस्य रामस्य शुभलोचने ।
तव शुश्रूषमाणस्य किमर्थं विप्रवासनम् ॥२४॥

रामो हि भरताद् भूयस्तव शुश्रूषते सदा ।
विशेषं त्वयि तस्मात् तु भरतस्य न लक्षये ॥२५॥

शुश्रूषां गौरवं चैव प्रमाणं वचनक्रियाम् ।
कस्तु भूयस्तरं कुर्यादन्यत्र पुरुषर्षभात् ॥२६॥

बहूनां स्त्रीसहस्राणां बहूनां चोपजीविनाम् ।
परिवादोऽपवादो वा राघवे नोपपद्यते ॥२७॥

सान्त्वयन् सर्वभूतानि रामः शुद्धेन चेतसा ।
गृह्णाति मनुजव्याघ्रः प्रियैर्विषयवासिनः ॥२८॥

सत्त्वेन लोकाञ्जयति द्विजान् दानेन राघव ।
गुरूञ्छुश्रूषया वीरो धनुषा युधि शात्रवान् ॥२९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् ।
विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ।।३०।।

तस्मिन्नार्जवसंपन्ने देवि देवोपमे कथम् ।
पापमाशंससे रामे महर्षिसमतेजसि ।।३१।।

न स्मराम्यप्रियं वाक्यं लोकस्य प्रियवादिनः ।
स कथं त्वत्कृते रामं वक्ष्यामि प्रियमप्रियम् ।।३२।।

क्षमा यस्मिंस्तपस्त्यागः सत्यं धर्मः कृतज्ञता ।
अप्यहिंसा च भूतानां तमृते का गतिर्मम ।।३३।।

मम वृद्धस्य कैकेयि गतान्तस्य तपस्विनः ।
दीनं लालप्यमानस्य कारुण्यं कर्तुमर्हसि ।।३४।।

पृथिव्यां सागरान्तायां यत्किञ्चिदधिगम्यते ।
तत्सर्वं तव दास्यामि मा च त्वं मृत्युमाविश ।।३५।।

अञ्जलिं कुर्मि कैकेयि पादौ चापि स्पृशामि ते ।
शरणं भव रामस्य माऽधर्मो मामिह स्पृशेत् ।।३६।।

इति दुःखाभिसन्तप्तं विलपन्तमचेतनम् ।
घूर्णमानं महाराजं शोकेन समभिप्लुतम् ।।३७।।

पारं शोकार्णवस्याशु प्रलपन्तं पुनः पुनः ।
प्रत्युवाचाथ कैकेयी रौद्रा रौद्रतरं वचः ।।३८।।

यदि दत्त्वा वरौ राजन् पुनः प्रत्यनुतप्यसे ।
धार्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ।।३९।।

यदा समेता बहवस्त्वया राजर्षयः सह ।
कथयिष्यन्ति धर्मज्ञ तत्र किं प्रतिवक्ष्यसि ।।४०।।

यस्याः प्रसादे जीवामि या च मामस्यपालयत् ।
तस्याः कृता मया मिथ्या कैकेय्या इति वक्ष्यसि ।।४१।।

(वाल्मीकिरामायण, अयोध्याकाण्ड)

□

CC-0. Nepal Sanskrit Academy, Kathmandu

उठीवास

त्रिपञ्चाशः सर्गः

स तं वृक्षं समासाद्य सन्ध्यामन्वास्य पश्चिमाम् ।
रामो रमयतां श्रेष्ठ इति होवाच लक्ष्मणम् ।।१।।

अद्येयं प्रथमा रात्रिर्याता जनपदाद् बहिः ।
या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हति ।।२।।

जागर्तव्यमतन्द्रिभ्यामद्यप्रभृति रात्रिषु ।
योगक्षेमौ हि सीताया वर्तेते लक्ष्मणाऽवयोः ।।३।।

रात्रिं कथंचिदेवेमां सौमित्रे वर्तयामहे ।
अपवर्तामहे भूमावास्तीर्य स्वयमर्जितैः ।।४।।

स तु संविश्य मेदिन्यां महार्हशयनोचितः ।
इमाः सौमित्रये रामो व्याजहार कथाः शुभाः ।।५।।

ध्रुवमद्य महाराजो दुःखं स्वपिति लक्ष्मण ।
कृतकामा तु कैकेयी तुष्टा भवितुमर्हति ।।६।।

सा हि देवी महाराजं कैकेयी राज्यकारणात् ।
अपि न च्यावयेत् प्राणान् दृष्ट्वा भरतमागतम् ।।७।।

अनाथश्च हि वृद्धश्च मया चैव विना कृतः ।
किं करिष्यति कामात्मा कैकेय्या वशमागतः ।।८।।

इदं व्यसनमालोक्य राज्ञश्च मतिविभ्रमम् ।
काम एवार्थधर्माभ्यां गरीयानिति मे मतिः ।।९।।

को ह्यविद्वानपि पुमान् प्रमदायाः कृते त्यजेत् ।
छन्दानुवर्तिनं पुत्रं तातो मामिव लक्ष्मण ।।१०।।

सुखी बत सुभार्यश्च भरतः कैकयीसुतः ।
मुदितान् कोसलानेको यो भोक्ष्यत्यधिराजवत् ।।११।।

CC-0. Nepal Sanskrit Academy, Kathmandu

स हि राज्यस्य सर्वस्य सुखमेकं भविष्यति ।
ताते तु वयसाऽतीते मयि चाऽरण्यमाश्रिते ॥१२॥

अर्थधर्मौ परित्यज्य यः काममनुवर्तते ।
एवमापद्यते क्षिप्रं राजा दशरथो यथा ॥१३॥

मन्ये दशरथान्ताय मम प्रव्राजनाय च ।
कैकेयी सौम्य संप्राप्ता राज्याय भरतस्य च ॥१४॥

अपीदानीं तु कैकेयी सौभाग्यमदमोहिता ।
कौसल्यां च सुमित्रां च सा प्रबाधेत मत्कृते ॥१५॥

माताऽस्मत्कारणाद्देवी सुमित्रा दुःखमावसेत् ।
अयोध्यामित एव त्वं काले प्रविश लक्ष्मण ॥१६॥

अहमेको गमिष्यामि सीतया सह दण्डकान् ।
अनाथा याहि नाथस्त्वं कौसल्याया भविष्यसि ॥१७॥

क्षुद्रकर्मा हि कैकेयी द्वेषादन्यायमाचरेत् ।
परिदद्याद्धि धर्मज्ञ गरं ते मम मातरम् ॥१८॥

नूनं जात्यन्तरे तात स्त्रियः पुत्रैर्वियोजिताः ।
जनन्या मम सौमित्रे तदद्यैतदुपस्थितम् ॥१९॥

मया हि चिरपुष्टेन दुःखसंवर्धितेन च ।
विप्रयुज्यत कौसल्या फलकाले धिगस्तु माम् ॥२०॥

मा स्म सीमन्तिनी काचिज्जनयेत् पुत्रमीदृशम् ।
सौमित्रे योऽहमम्बाया दद्मि शोकमनन्तकम् ॥२१॥

मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण सारिका ।
यत् तस्याः श्रूयते वाक्यं शुक पादमरेर्दश ॥२२॥

शोचन्त्याश्चाल्पभाग्याया न किंचिदुपकुर्वता ।
पुत्रेण किमपुत्राया मया कार्यमरिंदम ॥२३॥

अल्पभाग्या हि मे माता कौसल्या रहिता मया ।
शेते परमदुःखार्ता पतिता शोकसागरे ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu

एको ह्यहमयोध्यां च पृथिवीं चापि लक्ष्मण ।
तरेयमिषुभिः क्रुद्धो ननु वीर्यमकारणम् ॥२५॥

अधर्मभयभीतश्च परलोकस्य चानघ ।
तेन लक्ष्मण नाद्याहमात्मानमभिषेचये ॥२६॥

एतदन्यच्च करुणं विलप्य विजने बहु ।
अश्रुपूर्णमुखो दीनो निशि तूष्णीमुपाविशत् ॥२७॥

(वाल्मीकिरामायण, अयोध्याकाण्ड)

□

CC-0. Nepal Sanskrit Academy, Kathmandu

विश्रान्ति

महाभारत–खण्ड

मैले जीवनमा अरू विषयका आस्वाद छोडीकन
विद्याकै रसमा भुलेर रसिलो काटें जवानीकन ।
मेरो मात्र नभै अनेक जनको साझा बनोस् सौख्य यो
भन्ने भाव लिई गुनी हृदयले हे विज्ञ हो, लेख्छु यो ।।

वि. सं. २०१४।१०।१५।३

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

उद्योग

(पहिलो सर्ग)

बाह्र वर्षतकको वनवास
एक वर्षतक गुप्त निवास ।
सिद्धियो, सकल पाण्डव भाइ
निस्किए निज कबूल पुऱ्याई ॥

॥ १ ॥

मत्स्यदेशनृपकी तनयाको
साथ पाण्डुसुतका सुतको भो ।
खूप उत्सवसमेत विवाह,
डाकिए बटुलिए निज पक्ष ॥

॥ २ ॥

भो सबै परिणयोत्सव पूर्ण,
राजनीतितिर भै सहतृष्ण ।
डाकियो अनि सभा पनि ठूलो,
कृष्णको प्रथम भाषण यो भो ॥

॥ ३ ॥

कृष्णको भाषण

सत्यमा रत युधिष्ठिरलाई
द्यूतमा छल गरेर फसाई ।
धूर्त ती शकुनिले धन, धाम,
भूपता हरिलिए नि तमाम ॥

॥ ४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

यो कुरा सब यहाँहरुलाई
थाह नै छ, कतिसम्म मिचाइ ।
भैरहेछ, यसको पनि याद
विज्ञ सज्जनविषे हुनुपर्छ ॥

॥ ५ ॥

बाह्र वर्ष वनवासज दुःख,
एक वर्ष परदास्यज दुःख ।
राजपुत्रहरुलाइ दिलाई
धूर्तले कति गरे नि मिचाइ ॥

॥ ६ ॥

धूर्तबाट यतिसम्म कुकर्म
भैदिँदा पनि सही सब मर्म ।
पाण्डुपुत्रहरुले निज धर्म
सम्झँदै गरिरहे शुभ कर्म ॥

॥ ७ ॥

पाण्डुपुत्रहरुलाइ जितेर
राज्य हर्न कुन सक्तछ वीर ।
झुक्तथे यदि यिनी रणतर्फ
बन्दथे सकल धूर्त सखाप ॥

॥ ८ ॥

बन्धु हुन् सब सुयोधन आदि,
दुःख भोग्नु नपरोस् यिनलाई ।
जे भयो जति भयो सब भैगो
भन्दछन् अज्ञ युधिष्ठिरजी यो ॥

॥ ९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

धर्म–मार्गकन दूर गरेर
स्वर्गको पनि रजाइँ गरेर ।
बस्नखातिर कुनै पनि यत्न
धर्मराज नृपबाट हुँदैन ॥

॥ १० ॥

धर्म-मार्ग-परिपालन होस्रोस्
एक गाउँतककै नृपता होस् ।
शान्तिसाथ मनलाइ बुझाई
बस्न छन् नृप युधिष्ठिर राजी ॥

॥ ११ ॥

पाण्डुका तनयले सुख पाऊन्,
धार्तराष्ट्र पनि दुःख नपाऊन् ।
जे गरे यति सबै हुन जान्छ,
त्यै कुरा अब मिलाउनुपर्छ ॥

॥ १२ ॥

अंशबाट अति थोर रजाइँ
पाउँदा स्वबललाई बढाई ।
पार्थले नृपति धेर जितेर
राज्य आर्जन गरे सुविशाल ॥

॥ १३ ॥

धार्तराष्ट्रहरुबाट कुकर्म
धेर भो, अति गरे छलछाम ।
धर्मराज नृपलाइ फसाई
द्यूतमा अनि कबूल गराई ॥

॥ १४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

त्यो छली शकुनिसाथ भिडाई
राज्य-भोग सब हात लगाई ।
हाय हाय वनतर्फ लघारे,
तेह्र वर्षतक दुःख दिलाए ।।

।। १५ ।।

तेह्र वर्षतक दुःख सहेर
पाण्डुपुत्रहरुले स्वकबूल ।
जालझेल नगरेर पुऱ्याए,
लोकसम्मुख सुचित्र ठड्याए ।।

।। १६ ।।

भो कबूल सब पूरित हाम्रो,
जे थियो अघि उपार्जन हाम्रो ।
त्यो मिलोस् अब भनीकन दावी
गर्दछन् सकल पाण्डव भाइ ।।

।। १७ ।।

पाण्डुपुत्र पनि बान्धव हाम्रा,
धार्तराष्ट्र पनि बान्धव हाम्रा ।
हुन्, तसर्थ दुइतर्फ बिगार
क्यै नहोस्, यति गरौं सुविचार ।।

।। १८ ।।

पाण्डुपुत्रहरु छन् अति शूरा,
गर्दछन् निज कबूल त पूरा ।
सत्यमा छ यिनको अति आस्था,
त्यै हुँदा सब सहे दुरवस्था ।।

।। १९ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

सत्य मार्ग रिपुले अज्ञ छोडी
दुःख नै दिन भनेर तयारी ।
गर्दछन् त यिनको पनि भित्र
क्रोध बल्न पनि के छ र बेर ॥

॥ २० ॥

इष्टमित्र यिनका बहुतै छन्,
ती सबै त यिनको हित खोज्छन् ।
पार्थको प्रबल पक्ष लिएर
सैन्य सज्जित हुनेछ विशाल ॥

॥ २१ ॥

धार्तराष्ट्रहरुका कुचरित्र
जान्दछन् सकल बान्धव मित्र ।
दुश्चरित्र तिनलाई सखाप
पार्दिनेछ अनि पाण्डवकोप ॥

॥ २२ ॥

यो भयस्थिति हटीकन जाओस्,
शान्तिमा उभय पक्ष रमाओस् ।
शान्ति ल्याउन यहाँहरुबाट
गर्नुपर्दछ गभीर विचार ॥

॥ २३ ॥

भिन्न भैकन गरेर विचार,
एक भैकन गरेर विचार ।
विज्ञ सज्जन यहाँहरुबाट
एक निर्णय हुनेछ तयार ॥

॥ २४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

भाव के नृप सुयोधनको छ,
बुझ्नु त्यो अब यथार्थ भलो छ ।
गर्नलाई निज निश्चित नीति
बुझ्नुपर्छ परपक्षज नीति ।।
।। २५ ।।

एक योग्य जन दूत बनाई
कौरव क्षितिपछेउ पठाई ।
बुझ्नु ती नृपतिको मनलाई
लाग्छ काम अति योग्य मलाई ।।
।। २६ ।।

कृष्णको वचनलाइ सुनेर
बोल्न तत्पर भए बलभद्र ।

बलभद्रको भाषण

भाइको वचनलाइ यहाँले
सुन्नुभो मन दिईकन ऐले ।।
।। २७ ।।

हस्तिनापुरनराधिपछेउ
एक योग्य जन दूत पठाऊँ ।
भाइको छ यति मुख्य भनाइ
यो कुरो उचित लाग्छ मलाई ।।
।। २८ ।।

धर्मराज नृपले निज राज्य
द्यूतले अघि गरे परभोग्य ।
राज्य जो अघि गुम्यो, उ उकास्न
गर्दछन् नृपति ती अब यत्न ।।
।। २९ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

पाण्डुका तनय छन् सब योग्य,
धार्तराष्ट्र पनि छन् सब योग्य ।
हुन् दुवै स्वजन, सन्धि गरेर
ती रहून् यति गरौं सुविचार ।।

।। ३० ।।

भागशान्तिसँग राज्य लिएर
शान्त होस् अब युधिष्ठिरपक्ष ।
भागशान्तिसँग राज्य दिएर
शान्त होस् कुरुमहीश्वरपक्ष ।।

।। ३१ ।।

दूत गै यति मिलाउनुपर्छ
नम्रतासँग कुरा हुनुपर्छ ।
धार्तराष्ट्रहरुको अपमान
गर्नुचाहिँ शुभ काम हुँदैन ।।

।। ३२ ।।

द्यूतबाट कुभलो हुन जान्छ,
छोड्नु यो व्यसन बेस कुरा छ ।
बान्धवोक्ति यति भो बिनसित्ति
धर्मराज नृपको मननिम्ति ।।

।। ३३ ।।

द्यूतमा नृप युधिष्ठिर तम्से,
जोशले सकल होश गुमाए ।
थाप्तथे धन तथा धन हार्न्थे,
द्यूतले सकल राज्य उडाए ।।

।। ३४ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

कर्ण वा नृप सुयोधन आदि
द्यूतमा यदि युधिष्ठिर जोडी ।
छान्दथे त बढियै पनि हुन्थ्यो,
हार जीत दुइतर्फ रहन्थ्यो ।।

।। ३५ ।।

बस्तथे विविध धेर जुवाडी,
ती सबैकन त्यसै पर सारी ।
द्यूतमा शकुनिकै सँग भिड्दा
हार भो, हुन गयो दुरवस्था ।।

।। ३६ ।।

द्यूतमा शकुनि खूप मिलाई
हान्न सक्छ, त्यसले सबलाई ।
जित्छ, त्यो कपटको घर नै हो,
जान्दछन् सकल लोक कुरा यो ।।

।। ३७ ।।

त्यै छलीसँग गईकन भिड्नु
योग्य काम कसरी अब भन्नु ।
द्यूतमा छल रहन्छ, तसर्थ
छैन क्यै शकुनिको अपराध ।।

।। ३८ ।।

जे भए पनि भयो, अबलाई
पाण्डु भूमिपतिका सुतलाई ।
भूपको पद दिलाउनुपर्छ,
यै कुरो अब मिलाउनुपर्छ ।।

।। ३९ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

वृद्ध भीष्म कुरुराजसभामा,
बस्तछन् निपुण धेर कुरामा ।
नम्रतासहितको व्यवहार
बन्न सक्तछ त्यहाँ शुभकार ॥
॥ ४० ॥

युद्धमा व्यय तथा क्षय हुन्छ,
हार नै पनि त्यहाँ हुन सक्छ ।
सामले सब पटाउनुपर्छ,
दण्डमा भयसमेत रहन्छ ॥
॥ ४१ ॥

बोल्दैथे बलभद्र, सात्यकि उठे भै क्रोधले विह्वल,
लागे बोल्न झिकेर जोश बहुतै ऊचो गराई स्वर ॥

सात्यकिको भाषण

जस्तो बुद्धि रहन्छ, वाक्य उसको निस्कन्छ उस्तै गरी,
तिम्रो बुद्धि रहेछ शून्य बुझियो, साँच्चै रहेछौ हली ॥
॥ ४२ ॥

हुन्छन् पादपमा प्रशस्त फलले हाँगा कुनै शोभित,
देखिन्छन् त्यस वृक्षमा पनि कुनै हाँगाहरू निष्फल ॥
जन्मन्छन् पुरुषार्थका घरसरी कोही महापूरुष,
जन्मन्छन् त्यस वंशमा पनि कुनै अत्यन्त निष्पौरुष ॥
॥ ४३ ॥

बोल्दछन् मनपरी मतिहीन,
दोष क्यै पनि तिनीकन दिन्नँ ।
यो अनर्थक कुरा जुन सुन्छन्,
दोषभाजन तिनै जन हुन्छन् ॥
॥ ४४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

यो सभा भवनमा यसरी यो
सत्यमा रत युधिष्ठिरलाई ।
लाउँछन् विविध दोष असत्य,
चूप छन् सकल यी अज्ञ सभ्य ।।

।। ४५ ।।

द्यूतका कपटलाई नजान्ने
सत्यकै नियममा भर पर्ने ।
छन् युधिष्ठिर, तिनीकन डाकी
त्यो छली शकुनिसाथ भिडाई ।।

।। ४६ ।।

राज्य हर्न जुन भो छलछाम,
भन्न सक्छ कुन त्यो शुभ काम ?
धर्मराज नृपको घर जाई
भाइ बान्धवहरू सब राखी ।।

।। ४७ ।।

खेल त्यो यदि खुलासँग हुन्थ्यो,
इष्टमित्रहरुको मन बुझ्थ्यो ।
द्यूतमा यदि खुलासँग जित्थे
जीत हार अनि सत्य ठहर्थे ।।

।। ४८ ।।

अंशमा सकलको हक हुन्छ,
त्यो लिने मन युधिष्ठिरको छ ।
नम्रता हक लिँदा किन गर्ने
दुष्टको चरणमा किन पर्ने ? ।।

।। ४९ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

नम्रता सुजनसाथ गरिन्छ,
लात नै कुजनलाइ दिइन्छ ।
लातयोग्यसँग बात गरेर
बस्नु ता समय फाल्नु छ खेर ।।

।। ५० ।।

युद्धकै तिर म ता अघि सर्छु,
धार्तराष्ट्रहरुलाइ लछार्छु ।
ती छली जनहरूकन बाँध्छु
धर्मराज–पद–सेवक पार्छु ।।

।। ५१ ।।

छन् स्वयं सकल पाण्डव वीर,
छन् सहाय तिनका रणशूर ।
युद्धमा छ तिनको अति नाम,
बुझ्छ बात यति लोक तमाम ।।

।। ५२ ।।

धार्तराष्ट्रहरुले सब तिर्छन्
जालझेल तिनले अब छाड्छन् ।
भूइँमा कित तिनीहरू लड्छन्,
स्याल गिद्धहरु भोजन गर्छन् ।।

।। ५३ ।।

पाण्डुपुत्रहरुका ससुराले
यी कुरा सब सुनीकन बोले ।

द्रुपदको भाषण

नम्रताकन सुयोधन भन्छन्
पाण्डुपुत्र कमजोर भएछन् ।।

।। ५४ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

छन् सुयोधन हठी, तिनबाट
अंश पाउनु कठोर कुरा छ ।
पुत्रको प्रणयमा धृतराष्ट्र
भूपको मन सधैँ लहसिन्छ ।।

।। ५५ ।।

द्रोण, भीष्म दुइटै सब बुझ्छन्,
शान्ति नीतिकन ती पनि खोज्छन् ।
किन्तु छैन तिनको दृढ चित्त,
लाग्दछन् पछि सुयोधनसाथ ।।

।। ५६ ।।

कर्ण औ शकुनि दूर निहार्न
छन् अशक्त, पछिको परिणाम ।
क्यै विचार नगरेर सदैव
लाग्दछन् नृप सुयोधनसाथ ।।

।। ५७ ।।

शान्ति आउनु यहाँ कठिनै छ,
युद्ध निश्चित मलाइ त लाग्छ ।
दूर दूरतक दूत पठाई
डाक्नुपर्छ सब भूपतिलाई ।।

।। ५८ ।।

युद्धकै तिर सुयोधन लाग्छन्,
धेर दूत तिनले पनि छोड्छन् ।
आइपुग्छ जुन दूत अगाडि
तान्न सक्छ त्यसले नृपलाई ।।

।। ५९ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

दूत सत्वर पठाउनुपर्छ
धेर लाभ यसले हुन सक्छ ।
धार्तराष्ट्रहरुलाइ उछिन्न
गर्नुपर्छ भरिसक्य प्रयत्न ।।
।। ६० ।।

छन् पुरोहित सुशिक्षित मेरा,
दूतकर्मतिरको अभिभारा ।
ती सफासँग पटाउन सक्छन्,
हस्तिनापुर तिनै द्विज जाऊन् ।।
।। ६१ ।।

टुङ्गियो द्रुपदको जब बोली
निस्कियो फिर जनार्दन वाणी ।

कृष्णको दोस्रो भाषण

ज्ञानवृद्ध, वयले पनि वृद्ध
धेर नै अनुभवी हुनुहुन्छ ।।
।। ६२ ।।

बुझ्नुहुन्छ सब तत्त्व पदार्थ,
देखनुहुन्छ परसम्म यथार्थ ।
शिष्य झैं सकल छौं, उपदेश
पाउँदा हृदय हुन्छ सहर्ष ।।
।। ६३ ।।

भाइ पाण्डु नृप हुन्, धृतराष्ट्र
दाजु हुन्, दुइ थरैसँग गाढ ।
प्रेमबन्धन हुँदा दुइटैको
होस् भलो, यति छ चिन्तन मेरो ।।
।। ६४ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

छन् सुयोधन हठी, तिनबाट
अंश पाउनु कठोर कुरा छ ।
पुत्रको प्रणयमा धृतराष्ट्र
भूपको मन सधैँ लहसिन्छ ।।

।। ५५ ।।

द्रोण, भीष्म दुइटै सब बुझ्छन्,
शान्ति नीतिकन ती पनि खोज्छन् ।
किन्तु छैन तिनको दृढ चित्त,
लाग्दछन् पछि सुयोधनसाथ ।।

।। ५६ ।।

कर्ण औ शकुनि दूर निहार्न
छन् अशक्त, पछिको परिणाम ।
क्यै विचार नगरेर सदैव
लाग्दछन् नृप सुयोधनसाथ ।।

।। ५७ ।।

शान्ति आउनु यहाँ कठिनै छ,
युद्ध निश्चित मलाइ त लाग्छ ।
दूर दूरतक दूत पठाई
डाक्नुपर्छ सब भूपतिलाई ।।

।। ५८ ।।

युद्धकै तिर सुयोधन लाग्छन्,
धेर दूत तिनले पनि छोड्छन् ।
आइपुग्छ जुन दूत अगाडि
तान्न सक्छ त्यसले नृपलाई ।।

।। ५९ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

दूत सत्वर पठाउनुपर्छ
धेर लाभ यसले हुन सक्छ ।
धार्तराष्ट्रहरुलाइ उछिन्न
गर्नुपर्छ भरिसक्य प्रयत्न ।।
।। ६० ।।

छन् पुरोहित सुशिक्षित मेरा,
दूतकर्मतिरको अभिभारा ।
ती सफासँग पटाउन सक्छन्,
हस्तिनापुर तिनै द्विज जाऊन् ।।
।। ६१ ।।

टुङ्गियो द्रुपदको जब बोली
निस्कियो फिर जनार्दन वाणी ।

कृष्णको दोस्रो भाषण

ज्ञानवृद्ध, वयले पनि वृद्ध
धेर नै अनुभवी हुनुहुन्छ ।।
।। ६२ ।।

बुझ्नुहुन्छ सब तत्त्व पदार्थ,
देख्नुहुन्छ परसम्म यथार्थ ।
शिष्य झैँ सकल छौँ, उपदेश
पाउँदा हृदय हुन्छ सहर्ष ।।
।। ६३ ।।

भाइ पाण्डु नृप हुन्, धृतराष्ट्र
दाजु हुन्, दुइ थरैसँग गाढ ।
प्रेमबन्धन हुँदा दुइटैको
होस् भलो, यति छ चिन्तन मेरो ।।
।। ६४ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

द्रोणका पनि सखा हुनुहुन्छ,
युद्धका सब कुरा विदितै छ ।
कौरवेश्वर यहाँकन मान्छन्,
धेर आदर अरू पनि गर्छन् ।।

।। ६५ ।।

शान्तिले सकलको हित होला,
यै कुरा अब मिलाउनुपर्ला ।
धार्तराष्ट्र हठमै यदि अड्नन्
ती स्वयं कुनयको फल भोग्नन् ।।

।। ६६ ।।

सिद्धियो परिणयोत्सव, जान्छौं,
वृद्ध विज्ञसँग आशिष माग्छौं ।
कृष्णको वचन भो परिपूर्ण,
त्यो सभा पनि भयो अनि पूर्ण ।।

।। ६७ ।।

लागे सभ्यहरू स्वदेशतिरमै, धेरैजसा ती गए,
पञ्चालेश विराटको नगरमै उद्योग गर्दै बसे ।
बिस्तारै दुइतर्फमै समरको उद्योग चल्दै गयो
पृथ्वी नै दुइ फ्याक हुन्छ कि भनी शङ्का निकैको भयो ।।

।। ६८ ।।

(वि. सं. २०३६ मा प्रकाशित कविता पुन: प्रवेशाङ्क– १ का ५–१९ पृष्ठबाट)

□

CC-0. Nepal Sanskrit Academy, Kathmandu

उद्योग

(दोस्रो सर्ग)

विचार आफ्ना नृपको बुझीकन,
सन्देश कुन्तीसुतको लिईकन ।
पञ्चालदेशाधिपका पुरोहित
हुँदा भए प्रस्थित हस्तिनापुर ।।

।। १ ।।

सत्कार राम्रो धृतराष्ट्रले गरे,
सभा बस्यो, भाषण दूतले गरे ।

द्रुपदका पुरोहितको भाषण

हुन् दाजुका पुत्र सुयोधनादिक,
हुन् भाइका पुत्र युधिष्ठिरादिक ।।

।। २ ।।

दुवै थरीको हक हुन्छ अंशमा,
यो न्याय हो, किन्तु भएन यो यहाँ ।
भो एकलौटी धृतराष्ट्रपुत्रको
भयो बिचल्ली अनि पाण्डुपुत्रको ।।

।। ३ ।।

थियो निजी आर्जन पाण्डुपुत्रको,
अन्यायले त्यो पनि हाय खोसियो ।
जे भो भयो भो, अझ शान्त भैकन
स्वभाग माग्छन् सब पाण्डुनन्दन ।।

।। ४ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

स्वभाग पाऊन् अब पाण्डुनन्दन,
आएँ यही गर्न भनी निवेदन ।
छोड्दैन दाबी निज अंशको जन,
हो एकलौटीपन धर्मलङ्घन ॥

॥ ५ ॥

